Thanjavur Sarasvati Mahal Series - No. 254.

Bhosalavaṃśāvali Campū

ALIAS

Śrī Sarabhoji Rājā Caritram

(1711 — 1729 A. D.)

By

VENKATESA KAVI

THANJAVUR MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY SOCIETY,
THANJAVUR.

1987]

Thanjavur Sarasvati Mahal Series - No. 254.

Bhosalavamśāvali Campū

ALIAS

Śrī Sarabhoji Rāja Caritram

(1711 — 1729 A. D.)

By

VENKATESA KAVI

Edited with Introduction in Sanskrit and Tamil

By

Vedanta Visharata, Vedanta Siromani and Tamil Vidwan

Thiru. N. SRINIVASAN

(Sanskrit Pandit, Sarasvati Mahal Library, Thanjavur)



THANJAVUR MAHARAJA SERFOJI'S

SARASVATI MAHAL LIBRARY SOCIETY, THANJAVUR.

1987] [Price Rs. 6—50

First Edition : — 1987.

Published with financial assistance
from the Government of Tamil Nadu.

Published by :

THANJAVUR MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY SOCIETY,
THANJAVUR.

Printed at

T. M. S. S. M. LIBRARY SOCIETY PRESS,
THANJAVUR.

श्रीशरभोजिराजचरितं

नाम

॥ भोसलवंशावलिचम्पूः ॥

॥ श्रीमद्वेङ्कटेशकवीश्वरेण प्रणीता ॥

सरस्वतीमहालय संस्कृतपण्डितेन

वेदान्तविशारद – वेदान्तशिरोमणि – तमिल् विद्वान् – विरुदभाजा

श्री. न. श्रीनिवासेन

संशोध्य, संस्कृतद्राविडीप्रस्तावनासहितं परिष्कृत्य संपादिता



प्रकाशकेन

तञ्जापुरीशरभोजिमहाराजस्य सरस्वतीमहालयभाण्डागारस्य

कार्यकारिणीसमितिद्वारा प्रकाशिता विलसतितमाम्

तञ्जापुरी

*

१९८७]

[मूल्य. रू. ६-५०

प्रथमावृत्तिः – १९८७

प्रकाशकः

तञ्जापुरी शरभोजिमहाराजस्य सरस्वतीभाण्डागारकार्यकारिणीसमितिः

तञ्जापुरी

तञ्जापुरी सरस्वतीभाण्डागार कार्यकारिणीसमिति मुद्राक्षरशालायां मुद्रितम्

வெளியிடுவோர் முன்னுரை.

தஞ்சை வரலாற்றில் சிறப்பானதொரு இடத்தைப் பெற்றவர்கள் தஞ்சை மராட்டிய மன்னர்கள். தஞ்சை மண்டலத்தை சுமார் 200 ஆண்டுக்காலம் சிறப்பாக ஆட்சிசெய்த இவர்தம் ஆட்சிக்காலத்தில் எழுந்த பன்மொழி இலக்கியங்கள், செப்புப் பட்டயங்கள், கல்வெட்டுக்கள் மற்றும் வரலாற்றுத் தொடர்புடைய கருவிகள் இதுவரையில் நூல் வடிவில் வெளிவராமை ஒரு பெருங்குறையாக இருந்தது. இதனால் இவர்களின் ஆட்சிக் காலத்தில் வளம்பெற்ற கலை, கலாச்சாரம், பண்பாடு மற்றும் வரலாறு குறித்த செய்திகளை உரிய முறையில் அறிய இயலவில்லை. இத்தகைய குறைபாடுகளை களையுமுகத்தான், இதுவரையில் ஓலைச் சுவடிகளில் மௌனத் தவம்புரிந்துவந்த மராட்டிய ஆட்சியின் மகத்துவத்தினை வெளியுலகிற்கு எடுத்து வழங்கும் பணியினை இந்நூலகம் செய்து மகிழ்கிறது.

தஞ்சை மராட்டிய மன்னர்களில் மூன்றாவது மன்னராகத் திகழ்ந்தவர் முதலாம் சரபோஜி (கி. பி. 1711—1729) ஆவார். இவர் தமது ஆட்சிக் காலத்தில் பின்வரும் சந்ததியினர் வளமும், பெருமையும் பெறத்தக்க பல்வேறு பணிகளை நிறைவேற்றியுள்ளார். அவற்றுள், கரிகால் பெருவளத்தான் எழுப்பித்த கல்லணையைச் செப்பனிட்டதும், தஞ்சைப் பெரியகோவிலுக்குக் குடமுழுக்குச் செய்வித்ததும் குறிப்பிடத்தக்கவை. இம்மன்னர் புகழ்பாடும் "போசல வம்சாவளி சம்பூ" என்னும் வடமொழி சிறுகாப்பியத்தை வெளியிடுவதில் மகிழ்ச்சியடைகிறேன். இந்நூலில் முதலாம் சரபோஜி மன்னரின் முடிசூட்டுவிழா பற்றிய செய்திகளையும், வரலாற்றுத் தொடர்புடைய பிறசெய்திகளையும் காணலாம்.

சிறந்த இந்த நூல்களை அச்சிற்குக் கொண்டுவரும் பணியை இந்நூலகத்தின் வடமொழிப் பண்டிதர் திரு. என். சீனிவாசன் அவர்கள் சிறப்பாகச் செய்துள்ளார். அவரது பணியைப் பாராட்டுகிறேன். நூலில் காணும் தமிழ்மொழி — வடமொழி முகவுரைகளும், தமிழாக்கச் சுருக்கமும் தமிழக வரலாற்றாய்வாளர்களுக்குப் பெரிதும் உதவுமென நம்புகிறேன். இந்நூல் வெளியிடப் பொருளுதவி வழங்கிய நடுவண் அரசுக்கு எனது நன்றி உரித்தாகுக. நூலக வளர்ச்சிப் பணிகளுக்கும், நூல்களை வெளியிடும் பணிகளுக்கும் போதிய பொருளுதவி செய்துவரும் மைய — மாநில அரசுகளுக்கு இந்நூலகம் என்றென்றும் கடமைப்பட்டிருக்கிறது.

இங்ஙனம்,

தஞ்சாவூர்,
5–3–1988.

மா. இராசு, இ. ஆ. ப.
மாவட்ட ஆட்சியர் மற்றும் இயக்குனர் பொறுப்பு,
சரசுவதி மகால் நூலகச் சங்கம்.

॥ प्रास्ताविकम् ॥

काव्यलक्षणम् -

कर्तुः कर्म काव्यम् । काव्यलक्षणमुद्दिश्य यद्यपि कवयो बहुशो भिद्यन्ते, तद्यथा —

'गुणालङ्कारयुक्तौ शब्दार्थौ काव्यमिति' — वामनः ॥

'निर्दोषगुणालङ्काररसवद्वाक्यं' काव्यमिति — भोजः ॥

'गुणालङ्काररीतिरसोपेतः सन्दर्भः' काव्यमिति — वाग्भटः ॥

'रमणीयार्थप्रतिपादकः शब्दः' काव्यमिति — पण्डितराजः ॥

'ध्वन्यात्मकं वाक्यं' काव्यमिति — महिमभट्टः ॥

'वाक्यं रसात्मकं' काव्यमिति — विश्वनाथः ॥

इत्येवंविधानि विविधानि लक्षणानि दृश्यन्ते । तथापि समेषामेषां विभिन्नलक्षणत्वेन प्रतिभासमानानामपि तात्पर्यविषयीभूतोऽर्थः समान एव । तच्च काव्यं हि 'यददोषौ सालङ्कारौ शब्दार्थौ' नाम । तदत्रैव सर्वाणि लक्षणानि काव्यस्य पर्यवसितानि भवन्ति । एतच्च काव्यं भूम्ना भवति छन्दोबद्धम् ॥

काव्यभेदः

तच्चेदं काव्यं श्रव्य-दृश्यभेदाद् द्विविधम् । तच्च श्रव्यं काव्यं, महाकाव्य-खण्डकाव्य-गीतिकाव्यभेदात्त्रिविधम् । दृश्यकाव्यन्तु पुनः 'नाटक-प्रकरण-भाण-प्रहसन-डिम-समवकार-ईहामृग-उत्सृष्टिकाङ्क-व्यायोग-वीथी'-भेदभिन्नमभिनेयरूपम् ॥

एतच्च किल काव्यं पुनर्गद्यपद्यमिश्रभेदात्त्रिविधम् । गद्यं हि नाम, "अपादः पदसन्तानश्छन्दोरहितो वाक्यसन्दर्भः" । पद्यञ्च, "छन्दोबन्धः" । मिश्रं काव्यन्तु, गद्यपद्यमयी साङ्का सोच्छ्वासा च चम्पूरभिधीयते ॥

चम्पूप्रबन्धः -

'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते' - इति चम्पूलक्षणमुपनिबध्नन् दर्पणकारः एवमुवाच । गद्यपद्ययोः संमिश्रणेन चम्पूर्निबध्यते । चम्पूकाव्ये हि गद्यपद्ययोः तावान् सम्बन्धः, यावान् सङ्गीते गीतिवाद्ययोर्नाम । आह च कविराजो भोजः -

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः ।
हृद्यापि वाद्यकलया कलितेव गीतिः ॥

-- रामायणचम्पूः

चम्पूप्रबन्धे च पुनरुभयोर्गद्यपद्ययोः प्रायशः समानरूपेणैव सन्निवेशात् तत्त्वं सम्यगुपपन्नं भवति । चम्पूकाव्येषु गद्यगुंफितकथामेवानुप्राणयन्ति पद्यानि मनोरञ्जनार्थञ्च सन्निवेश्यन्ते । चम्पूकाव्यप्रणालिः प्राचीनसंस्कृतसाहित्ये नयनगोचरीभवति । दशमशताब्द्याः प्राक् तु चम्पूकाव्यानां नामापि न श्रूयते । सर्वतः प्राक् क्रैस्त ६०० तमशतकभवेन तत्र भवता दण्डिमहाभागेन स्वकीये काव्यादर्शे चम्पूलक्षणमुपन्यस्तम् । ततः पूर्वतन एव स्याच्चम्पूप्रादुर्भाव इत्यनुमातुं न दुष्करम् ॥

चम्पूकाव्यस्य आद्यः प्रवर्तकस्तत्रभवान् त्रिविक्रमभट्टः । नलचम्पूर्नाम गन्थोऽनेन सर्वप्रथमतया विरचितः । अन्येऽपि बहवोऽद्भुताश्चम्पूग्रन्थकर्तारो विलसन्ति । सोमदेवसूरिः, भोजराजः, जीवगोस्वामी, कविकर्णपूरः, शेषकृष्णः, नीलकण्ठदीक्षितः, वेङ्कटाध्वरिः, तिरुमलाम्बा, श्रीनिवासकवि, इत्यादयः बहवः कवयोऽभूवन् ॥

वेङ्कटेशकविः कोऽयं ? कदाऽऽसीत्कृतयः कति ?

विदितमेवेदमैतिहासिकशेमुषीमतां समेषां विदुषां, यदिदानीं तन तिरुच्चि, तञ्जावूर् मण्डलान्तर्गतभूप्रदेशः 'चोलदेश' इति पुरा प्राप्तख्यता । तस्य चोलदेशस्य नगरीललामभूता तञ्जापुर्येव राजधान्यासीत् । राजधानीमिमां अधिष्ठाय, पूर्वं चोलाः, पश्चान्नायका नायकाः, तदनन्तरं जन्याजेयाः महाराष्ट्रीयराजन्यमूर्धन्याः चोलदेशमिमं पालयामासुः । तेषां समये चोलभूस्स्वर्णभूरभूत् ॥

A.D. 1684 — 1710 समये महाराष्ट्रीयराजन्यमूर्धन्येषु शाहजी महाराजः भुवमिमां शशास । सः जन्मना प्रभुरपि, क्रमेण कविः, नित्यप्रबन्धकर्ता, सङ्गीदसाहित्यादिषु अप्रतिहत प्रतिभावान् '**अभिनव भोज**' इति च प्रास्तूयत । तस्य च भ्राता प्रथमशरभोजिः A.D. 1711 — 1729 पर्यन्ते काले देशमिमं शासनेन, समृद्धमकरोत् । यथा ज्येष्ठः शाहजिमहाराजः इन्द्र इव नाकलोकं देशमिमं अलञ्चकार, तथैव तदनुजः प्रथमशरभोजिः उपेन्द्र इव व्यराजत ॥

तस्मिन्समये बहवः कवयः पदवाक्यप्रमाणपारावारपारङ्गताः पण्डिताश्च स्वस्वकृतिततिभिः भुवमिमां सारस्वतीमकुर्वन् । तेषु प्रधानतया परिगण्यमानः वेङ्कटेशकविरपि अन्यतमः । अयं **नैध्रुवकाश्यपगोत्र**पारावारोत्पन्नश्चन्द्रमाः । अस्य च पिता '**धर्मराज**' इति प्रख्याततमो महानुभावः । अयं कविः "शीर्कोषि" (சீர்காழி) प्रदेशपरिसरे 'मणलूर' ग्रामेऽवसदिति ज्ञायते । ताम्रशासने च विषयोऽयं प्रस्ताप्यते । शाहजीमहाराजशासनान्तर्गताः 'पालयक्कारर्' इति द्राविडयां प्रसिद्धाः केचन सामन्ता आसन् । तेषु '**अलकियचिदम्बररावुत्तमिण्डनयिनार्**' इति प्रसिद्धः सामन्तः शाहमहाराजाज्ञया "शीर्कोषि" समीपे विद्यमानाः भूमीः बहुभ्यः पण्डितवरेभ्यः दानरूपेणादात् इति [1] । तेषु पण्डितेषु अन्यतमः एवास्माकं वेङ्कटेशकविरपि ॥

अयं भोसलवंशावलीचम्पूः ; राघवानन्दं, नीलापरिणयं, सभापतिविलास इति नाटकत्रयमपि विरचयामास । उन्मत्तकविकलशं अथवा लम्बोदरप्रहसनमपि प्रणिनायेति ज्ञायते । [2]

मातृकाया विवरणम् —

अस्माकं सरस्वतीमहालयाख्ये मातृकागारे भोसलवंशावलीचम्पूः (D. 4240 B 5020) नाम कागदपत्रात्मिका एकैवमातृका समुपलभ्यते । मातृकान्तराभावात् शोधने महान्प्रयत्नः कृतः । मातृकालेखकः न. तादृशोबुधः, अतः सर्वत्र सर्वशः बहुविधादोषास्समुपालभ्यन्त । ग्रन्थमिमं संशोध्य प्रकाशयितुं शक्नुमो वा नवेत्यापि महान्संशयः समजनि ।

---

1. Fifty Copper plates of the Marathas of Thanjavur
— Tamil University Publication No. 1. P-33.
2. History of Classical Sanskrit Literature.
— By M. Krishnamachariar P 660 - 661.

कृतज्ञता हि निवेद्यते :—

अस्मिन्नेव समये अस्माकं महालयस्य भूतपूर्वसंस्कृतपण्डितः, बहूनां ग्रन्थानां सम्पादकश्च ब्रह्मश्री. **पु. म. पद्मनाभशर्मणा** महता परिश्रमेण सह ग्रन्थमिमं संशोधने सहायं करोदिति तस्मै कार्तज्ञ्यं निवेदयामि ।

ग्रन्थस्याऽस्य प्रकाशने मामर्हं मत्वा प्रकाशनाय प्रोत्साहितवन्तः भूतपूर्व तञ्जावूर् मण्डलाधिकारि श्रीमान् **R. सत्पती** I. A. S., महाशयाभ्यः, तथा श्रीमान् **मा. रामु** I.A.S., महाशयाभ्यः, महालयस्य तात्कालिकाधिकारिकेभ्यः श्री **अ. पञ्चनदं** M.A., B. Lib.Sc., महाशयेभ्यश्च कृतज्ञतां निवेदयामि । ग्रन्थमिमं सुन्दरतयामुद्रयित्वा प्रकाशनाय परमोपकारं कृतवद्भ्यः सरस्वतीमहालय मुद्राक्षरशालाकर्मचारिभ्यः धन्यवादान्समर्पयामि ॥

विशेषतः प्रियपाठकाः प्रार्थ्यन्ते — 'गच्छतस्स्खलनमि'तिरीत्या यत्र कुत्राऽपि अनुपपत्तिः, अन्यथापत्तिः इत्यादया दोषास्समुपलभ्यन्ते चेत् तान् संसूच्य, धन्यवादमपि स्वीकुर्वन्तु, प्रोत्साहयन्तुचास्मान् उत्तरोत्तरकर्मणीति शम् ॥

तञ्जावूर्
8—1—1987

एन्. श्रीनिवासः
संस्कृत पण्डितः

முகவுரை

௧

தஞ்சை மராட்டியர் வரலாற்றில் முதலாம் சரபோஜியின் முழுமையான வரலாறும் இதுகாறும் நமக்குக் கிடைக்கவில்லை. இதனால் தமிழகத்தின் வரலாற்றையும், சமஸ்கிருத இலக்கிய வரலாற்றையும் எழுதும்போது, அப்பணி பூரணத்துவம் அடையாமலிருக்கிறது எனில் மிகையில்லை. காரணம் இவருடைய வரலாற்றை எழுத உதவியாகவுள்ள அக்காலத்து நூல்கள் இன்னும் அச்சாகாமல் இருப்பதேயாகும்.

முதலாம் சரபோஜி மன்னன் கி. பி. 1711 முதல் 1729 வரை 18 ஆண்டுகள் தஞ்சை மண்டலத்தை அரசாண்டவர். இந்தக் காலங்களில் இவர் பல சோதனைகளையும், நான்கு போர்களையும் சந்தித்துள்ளார். இருந்தும் மனந்தளராது அரசை நடத்தியும், இழந்த தஞ்சையின் பகுதிகளை மீண்டும் தஞ்சையுடன் சேர்த்தும், பல நிரந்தரப் பணிகளை மேற்கொண்டும், சிறந்த போர்வீரனாகவும் திகழ்ந்தவர். இம்மன்னருடைய வரலாற்றையும், இவர்காலத்தில் எழுந்த நூல்களைப்பற்றியும் மிகவிரிவாக இந்நூலகப் பருவ இதழில் தொடர்ந்து எழுதப்பட்டுள்ளது. ஆகவே, இம்மன்னருடைய வரலாற்றை ஆய்வு செய்வோருக்கு அந்தக் கட்டுரைகள் பயனளிக்கும் என்பது எனது கருத்து. ஆதலால், இந்நூலைப் பயில்வோருக்கு அறியும் பொருட்டு முதலாம் சரபோஜியின் வரலாற்றை மிகச் சுருக்கமாகக் இனி காணலாம்.

தஞ்சையில் மராட்டியர் ஆட்சி :

தஞ்சையை ஆட்சிசெய்த முதல் மராட்டிய மன்னர் முதலாம் ஏகோஜி என்னும் வெங்கோஜி. இவர் சத்ரபதி சிவாஜியின் இளவல். ஏகோஜியின் பட்டத்துஅரசி தீபாம்பாள். இவள் இங்கிலே குலத்தில் தோன்றியவள்.* ஏகோஜி கி. பி. 1671-ஆம் ஆண்டு பெங்களூரின் ஆட்சிப் பொறுப்பில் அமர்ந்தார். 'சிவாஜியும் - ஏகோஜியும் இணைந்து தென்னாட்டைக் கைப்பற்றிவிடுவார்கள்' என்று கருதிய பிஜப்பூர் சுல்தான் அலியாதில்ஷா, இருவரும் இணையாமலிருக்கும் பொருட்டு ஏகோஜியுடன் நட்புகொண்டார்.

---

* இவருடைய வரலாற்றை 'குலவிளக்கு தீபாம்பாள்' என்ற தலைப்பில் இந்நூலகப் பருவ இதழில் ஒரு ஆராய்ச்சிக் கட்டுரை எழுதியுள்ளேன். —பருவ இதழ் எண். 33.

இந்நிலையில் மதுரை நாயக்கர் சார்பில் தஞ்சையை ஆண்டுகொண்டு வந்தார் அழகிரி நாயக்கர். தஞ்சை நாயக்க மன்னர்களின் கடைசி வாரிசான (விஜயரகவ நாயக்கரின் பேரன்) செங்கமலதாஸை தஞ்சையின் அரசு கட்டிலில் அமரச்செய்ய பீஜப்பூர் படையுடன் மன்னன் ஏகோஜி தஞ்சை வந்தடைந்தார். தனது படையினரைக்கொண்டு தஞ்சையை முற்றுகை யிட்டார். இதனுல் எழுந்தபோரில் அழகிரி நாயக்கர் தோற்று ஓடி ஒளிந்தார். உரிய வாரிசான செங்கமலதாசை கி. பி. 1675-ல் தஞ்சை அரசு கட்டிலில் அமர்த்தினுர் ஏகோஜி.

படைஎடுத்துவந்த செலவுத் தொகையைத் தரும்படி செங்கமலதாஸை கேட்டுக்கொண்டார். தனது படையின் தளபதிகளிடம் செலவுத் தொகை யைப் பெற்றுக்கொண்டு வருமாறு பணித்து, இவர் மற்ற படையினருடன் திருமழபாடியில் பாடிகட்டிக்கொண்டு தங்கி இருந்தார். அப்போது சக ஆண்டு 1596 ராக்ஷஸ ஆண்டு. (கி. பி. 1675-ல்) ஒரு நல்ல நாளில் ஏகோஜியின் பட்டமகிஷி தீபாம்பாளிடம் இரண்டாவது ஆண் குழந்தை பிறந்தது. நந்தமிழகத்தின் திருமழபாடியில், இரவு வேளையில் சரபோஜி மன்னன் பிறந் தான். இந்த சரபோஜியே இந்த நூலுக்குப் பாட்டுடைத் தலைவனுவான். மன்னன் ஏகோஜி மகிழ்ச்சிக் கடலில் திளைத்தபோது தஞ்சையின் அரசுப் பொருப்பு வலிய இவரைத் தேடிக்கொண்டு வந்தது.

தஞ்சையின் மன்னனுக முடிசூட்டப்பெற்றிருந்த செங்கமலதாஸ் சிறுவ னுகவும், அரசியலறிவைப் பெருமலும் இருந்தான். இதனுல் தஞ்சை அரசியலில் குழப்பங்கள் உண்டாயின. மேலும் படையெடுத்துவந்த செலவுக்குரிய தொகையைக் கொடுக்க இயலாமற்போகவே, குழப்பம் அதிகமாயிற்று. இந்நிலையில் அரண்மனையின் மந்திரி — பிரதானிகள் திருமழபாடியில் தங்கி யிருந்த ஏகோஜியிடம் வந்து 'தாங்களே தஞ்சையில் முடிசூட்டிக்கொண்டு ஆட்சிசெலுத்த வேண்டும்' என்று கேட்டுக்கொண்டனர். முதலில் மறுத்தும், பின் அதனை ஏற்றும் கி. பி. 1676-ல் தஞ்சையின் மன்னனுக முடிசூட்டிக் கொண்டார். இதன்பின் ஏகோஜிக்கு மூன்ருவது குழந்தை பிறந்து துக்கோஜி என்று பெயரிட்டார்.

சரபோஜி பல மொழிகளைப் பயின்ருர். சிறந்த விற்பயிற்சியும், சக்தி - தோமரம் போன்ற ஆயுதங்களையும்—அஸ்திரப் பயிற்சிகளையும்; இசை, நடனம், நாடகம், ஓவியம் போன்ற நுண்கலைகளையும் கற்று வாலிபப் பருவத்தை யடைந்தார். மன்னர் ஏகோஜி கி. பி. 1681-ல் காலமானுர்.

தனயனும் — தம்பியும்

ஏகோஜி காலமானதும், இவருடைய மூத்தமகன் இரண்டாம் ஷாஹஜி (கி. பி, 1684 — 1711) பட்டத்திற்கு வந்தார். இவர் பிறவிக்கலைஞர்.

சம்ஸ்கிருதமும் — தமிழும் இவர் காலத்தில் சிறந்து விளங்கின. பல அறிஞர்களைக்கொண்டு பல அறிய படைப்புக்களைப் படைக்கச்செய்தார். 'தஞ்சையின் கலைப்பாணி' என்ற பெயரை உலகமுழுவதும் தெரியச்செய்தவர் இவரே எனின் மிகையில்லை. இவர் ஆட்சிசெய்த காலத்தில் இருமுறை தஞ்சைமீது போர் தொடுத்தனர். புதுக்கோட்டை தொண்டைமானையும், திருச்சி நாயக்க மன்னரையும் முதலில் கி. பி. 1700 — 1702-க்கு இடையிலும். இரண்டாவதாக கி. பி. 1709-லும் போர்கள் நடைபெற்றன. இந்த இரு போர்களிலும் மராட்டியர் தோல்வியடைந்தனர் என்றாலும் கி. பி. 1709-ல் நடைபெற்ற போரில் நல்லனே தகர்க்கப்பட்டும், சேனைக்கு பலத்த சேதமும் ஏற்பட்டது. இதனால் மனமுடைந்த ஷாஹஜி தனது தம்பி முதலாம் சரபோஜிக்கு இளவரசுப் பட்டம் கட்டிவிட்டு அரசியலிலிருந்து துறவுகொண்டார். பின் கி. பி. 1711-ல் தனது 39-வது வயதில் காலமானார்.

முதலாம் சரபோஜியின் ஆட்சியில் :–

முதலாம் சரபோஜி கி. பி. 1711-ல் முடிசூடிக்கொண்டார். இவருடைய இளவல் துக்கோஜி மகாதேவப்பட்டினத்திலிருந்துகொண்டு தமையனுக்கு அரசியற்பணிகளில் உதவிசெய்தார். சரபோஜி மன்னன் காலமாகும்வரை இருவரும் இணைந்தே வாழ்ந்தனர். கி. பி. 1709-ல் நடைபெற்ற போரில் மராட்டியர் தோல்வியடையவும், பொருட்சேதமடையவும் காரணமாக இருந்த புதுக்கோட்டை மன்னனைப் பழிவாங்கக் காத்திருந்தார் சரபோஜி. இதனால் சேது நாட்டின் அரசரான விஜயரகுநாத சேதுபதியுடன் இணைந்து புதுக்கோட்டையின்மீது போர்தொடுத்தார். இருவருமே இப்போரில் தோல்வியடைந்தனர்.

பின், புதுக்கோட்டை தொண்டமானுடன் இணைந்துகொண்டு கி. பி. 1723-ல் சேது நாட்டின்மீது போர் தொடுத்தார் சரபோஜி. ஆயின் இப்போர் வெற்றி-தோல்வியின்றி முடிவடைந்துவிட்டது. காரணம் சேதுபதியின் படையில் அம்மைநோய் கண்டதே. இப்போரில் பீரங்கி, துப்பாக்கி முதலிய வைகளைப் பயன்படுத்தியுள்ளனர். மேலும் ஆங்கிலேயர்கள் இந்து அரசர்களின் படையில் கூலிப்படையினராகப் பணியாற்றியுள்ளனர் என்பதை இராமநாதபுரம் அரண்மனையில் காணப்படும் 'சுவரோவியங்கள்' தெளிவுபடுத்துகின்றன.*

விஜயரகுநாதசேதுபதி கி. பி. 1723-ல் காலமானார். அவருக்குப்பின் திருவுடையசேதுபதி பட்டம் சூட்டிக்கொண்டார். 'இந்தப் பட்டத்திற்கு

* ஓவியப்பாவை. —டாக்டர் நாகசாமி.

நானே உரிமையுள்ளவன்' என்று உரிமை கொண்டாடினுர் பவானிசங்கரன். இவர் கிழவன் சேதுபதியின் (கி. பி. 1673—1708) ஆசைக்கிழத்தியின் மகன். இருவருக்குள் பெரும்பகை மூண்டது. இதனுல் சரபோஜியின் உதவியை நாடினுர் பவானிசங்கரன். இவருக்குத் துணையாக மீண்டும் சேது நாட்டின்மீது போர் தொடுத்தார் சரபோஜி. இந்தப்போர் அறந்தாங்கியில் நடைபெற்றது. சரபோஜி மன்னரின் யானைப்படைகள் அறந்தாங்கிக் கோட்டையைத் தகர்த்தது. எதிரிகள் அழிக்கப்பட்டனர். சரபோஜி வெற்றியடைந்தார். பவானிசங்கரனுக்குச் சேதுபதி பட்டத்தைக் கட்டினுர். இதற்குப் பிரதியாக தஞ்சையின் நிலப்பகுதியுடன் பாம்பாற்றுக்கு வடக்கேயும் — பட்டுக் கோட்டைக்குத் தெற்கேயுமுள்ள நிலப்பகுதி இணைக்கப்பட்டது. கி. பி. 1729-ல் சரபோஜி காலமானுர்.

இவர்செய்த நிரந்தரப் பணிகள் :—

(1) கி. பி. 1709-ல் பழுதுபட்ட கல்லணையை கி. பி. 1715-க்குள் புதுப்பித்தார்.

(2) கி. பி. 1729-ல் தஞ்சைப் பெரியகோயிலில் பல திருப்பணிகளைச் செய்து கும்பாபிஷேகம் செய்வித்தார்.

(3) தஞ்சையின் தெற்குவீதியிலிருக்கும் கலியுக வரதராஜப் பெருமாள் கோவிலில் பல அழகிய சிற்பங்களை அமைத்துக்கட்டி கலைக்காவலனுக ஆனுர்.

(4) சமஸ்கிருதம்—தமிழ் ஆகிய மொழிப் புலவர்களுக்கு ஆதரவளித்தும் பல நிலங்களைத் தானம் செய்தும், பல இலக்கிய நூல்கள் வெளிவரக் காரண மாகவும் இருந்தார்.

(5) 12-4-1717-ல் திருவாரூர் தியாகேசப்பெருமான் திருக்கோவிலைப் புதுப்பித்து அஷ்டபந்தன கும்பாபிஷேகம் செய்துள்ளார்.

இதனுல் புலவர்கள், தங்களை ஆதரித்த புரவலனை சரபோஜியை 'சாகித்ய போஜன்' என்று அழைத்தனர்.* இம்மன்னர் காலத்துப் புலவர்கள் செய்த இலக்கியங்களில் பல இன்னும் வெளிவரவில்லை.

---

* இந்த நூலில் பக்கம் எண்: 25-ல் சரபோஜி மன்னனை 'சாஹித்ய போஜன்' என்று புலவர்கள் அழைத்தனர் என்று குறிப்பிட்டுள்ளார். ஆனுல் நூலில் இறுதிப் பாட்டில் தன்னையே 'சாஹித்ய போஜன்' என்றும் குறிப்பிட்டுள்ளார். இதில் யார் சாஹித்ய போஜன் என்பதைக் குறித்து அறிய அறிஞர்களாகிய உங்களிடமே விட்டுவிடுகிறேன்.

இந்நூலாசிரியர் வரலாறு :—

இந்நூலாசிரியன் தந்தையின் பெயர் **தர்மராஜர்** 'நைத்ருவ காஸ்யப' கோத்திரத்தினர். இவர் ஆறு மொழிகளில் பாண்டித்தியம் பெற்றவர். இதைப்போலவே ஆறுதர்சனங்களையும் அறிந்த மாமேதை. இவரது பணி புதிய புதிய நூல்களை இயற்றுவதே. ஒரு சமயம் 'ஞானேந்திர முனிவர்' என்பவரால் ஒரு கருத்தரங்கம் ஏற்பாடு செய்யப்பட்டது. இக் கருத்தரங்கில் பல பண்டிதர்கள் பங்கு கொண்டனர். அப்போது தர்மராஜரின் புலமையை அறிந்த முனிவர் "ஷட்பாஷா சார்வபௌமன்" என்ற பட்டத்தை அளித்துப் பாராட்டினர்.

இந்தக் கருத்தரங்கத்தில் 'தர்விகரண சிகாமணி' என்ற நூலுக்கு எவ்வித முயற்சியுமின்றி மிக எளிமையாகவும், சுலபமாகவும் ஒரு உரையை எழுதியுள்ளார். இவர் நமது மாநிலத்தில் நாகப்பட்டணம் வட்டத்திலுள்ள மணலூர்[1] (மாயவரம் அருகில்) அக்ரஹாரத்தில் வாழ்ந்தவர் என்று அறிய முடிகிறது. இச்செய்திகளை இந்நூலாசிரியர் தனது மற்றொரு நூலான 'சபாபதி விலாசம்' என்னும் நூலின் முகவுரையில் கூறியுள்ளார்.[2]

இவ்வளவு சிறப்பு வாய்ந்த புலவர் பெருமகனுக்கு இந்நூலாசிரியர் பிறந்தார். இவர் பெயர் வெங்கடேச கவி என்று குறிப்பிட்டுள்ளார். தன்னை 'சாகித்யபோஜன்' என்றும் குறித்திருக்கிறார். இவர் இரண்டாம் ஷாஹஜி (1684—1711) முதலாம் சரபோஜி ஆகியோரது அவைப்புலவர். இவரது புலமைக்காக மன்னன் மூலமாக சீர்காழிக்கு அருகிலுள்ள 'வரிசைப்பத்து' என்னும் கிராமத்தில் நிலக்கொடை அளித்துள்ளார்.[3]

இவர் எழுதிய ஏனைய நூல்கள் :

1. போசலவம்சாவளி சம்பூ ... காவியம்
2. சபாபதி விலாசம் ... நாடகம்
3. நீளா பரிணயம் ... ,,
4. ப்ரதிக்ஞா ராகவம் ... (இந்நூல் கிடைக்கவில்லை)
5. உன்மத்தகவி கலஶ ப்ரஹஸனம் ... ப்ரஹஸனம்
6. ராகவானந்தம் ... நாடகம்

---

1. मणलूरग्रहारनायकमणेः — नीलापरिणये.

2. प्रदिदिनप्रबन्धनिर्माणजन्मयशोधनसारडिण्डोलिकासुरभितदशदिशामुखः सकलभूमण्डलपण्डितमण्डितमणिनित्यहृद्यविद्यानटनरङ्गस्थलायमान ज्ञानेन्द्रमुनीन्द्रसभा संप्राप्त षड्भाषा सार्वभौमापरनामधेयः स विबुधेन्द्रः, यस्य दर्वीकरणशिखामणिभाष्यं जिह्वाग्रकृतसन्निधानं कमप्युत्कर्षं पुष्यति ... ...
— सभापतिविलासे (D. 4529)

3. மராட்டியர் செப்பேடுகள் — 50 பக்கம் - 33.

भो e

சுவடியின் வரலாறு :

இந்த போசலவம்சாவளி சம்பூ என்னும் இச்சுவடி ஒரே ஒரு காகிதச் சுவடியே இருக்கிறது. இச்சுவடியில் பல இடங்களில் குறைந்தும், பிறழ்ந்தும் இருக்கிறது. இதனால் பல சந்தர்ப்பங்களில் எனக்கு இடர்ப்பாடுகள் எழுந்தன. இச் சமயங்களில் எனக்கு அவ்வப்போது அறிவுரை கூறியும், இந்நூல் சீரிய பதிப்பாக வெளிவர உதவியவர், இந்நூலகத்தின் முன்னாள் பண்டிதரும், சம்ஸ்கிருத அறிஞருமான பிர்ம்மஸ்ரீ பு. ம பத்மநாப சர்மா அவர்கள்' அவர்களுக்கு எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

இந்த நூலைப் பதிப்பிக்கும் பணியை எனக்கு நல்கிய இந்த நூலக இயக்குனரும் முன்னாள் மாவட்ட ஆட்சியருமான திருவாளர் R. சத்பதி I. A. S. அவர்களுக்கும், இந்நாள் இயக்குனரும், மாவட்ட ஆட்சியருமான திருவாளர் மா. ராமு, I. A. S., அவர்களுக்கும், சீரிய முறையில் இந்நூல் வெளிவர உதவிய இந்த நூலக நிர்வாக அதிகாரி திரு. அ. பஞ்சநாதன், M. A., B. Lib. Sc., அவர்களுக்கும் எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

இதைப்பயிலும் வாசகர்கள், இதில் காணும் குறைகளைக் குறித்து எழுதினால் அது, அடுத்துப் பதிப்பிக்கும்போது 'திருந்திய பதிப்பாக' வெளிவர உதவும். எல்லாம் வல்ல எம்பெருமான் மேலும் மேலும் இப்படிப்பட்ட இலக்கிய பணிகளைச் செய்திட ஆக்கமும் ஊக்கமும் தந்து அருள்புரிவாராக. நன்றி,

தஞ்சாவூர்,
8—1—1987

ந. ஸ்ரீநிவாஸன்,
சம்ஸ்கிருத பண்டிதர்.

இந்நூலின் கதைச் சுருக்கம்

முதலாம் ஷாஹஜி டில்லியின் அரசன் ஔரங்கசீப், கோல்கொண்டா விஜயநகரத்து அரசர்களின் வணக்கத்துக்குரியவனாக இருந்தான். மேலும் கர்னாடகம், தொண்டி, சோழநாடு, பாண்டியநாடு, சேரநாடு, மகாராஷ்டிரம் அங்கம் வங்கம், கலிங்கம், நேபாளம், குந்தலம், மாகதம், அவந்தி முதலிய வற்றின் மன்னர்கள் இவருடைய அரச சபையை அலங்கரித்தனர். தனது தோள் வலிமையால் இவர்களை வென்று இவர்களிடம் கப்பம் பெற்றவர்.

இவருக்கு 'ஏகோஜி' என்று பெயரிய ஒரு மைந்தன் பிறந்தான். இவன் மிகுந்த அழகும் அதிர்ஷ்டமும் உடையவனாக இருந்தான். இப்பிள்ளையைப் போல் தங்களுக்குப் பிள்ளையில்லையே என்று மாற்றரசர்கள் பொறாமை கொண்டனர். இவரும் தனது தந்தைக்கு இணையாக சூரனாகவும் வீரனாகவும் திகழ்ந்தார். இவர் வாலிபப் பருவத்தையடைந்ததும் தீபாம்பாள் என்ற பெண் திருவை திருமணம் செய்துவைத்தனர் இவரது பெற்றோர். தந்தைக்குப் பின் ஏகோஜி (பெங்களூரின்) ஆட்சி செய்தார்.

இந்நிலையில், சோழநாட்டை (தஞ்சையை) பாண்டிய மன்னன் (மதுரை நாயக்கரின் ஆட்சியிலிருந்த திருச்சி நாயக்கர்) கைப்பற்றியுள்ளான் என்பதை அறிந்து 'பாண்டியனை எதிர்த்துப் போர் செய்ய வேண்டும்' என்று மந்திராலோசனையில் முடிவுசெய்த பின் அந்தப்புரம் சென்று இரவில் நித்திரை செய்யச் சென்றார். அச்சமயம் ஒரு கனவைக் கண்டார் ஏகோஜி. அதில் மும்மூர்த்திகளும் முச் சத்திகளும் வேதம் கற்ற அந்தணர் குழாத்துடன் தோன்றினர். அந்தணர்களிடம் மிகுந்த விநயத்துடன் 'தாங்கள் எதற்காக இங்கு எழுந்தருளியுள்ளீர்கள் ?' என்று மன்னன் ஏகோஜி கேட்டார். அப்போது 'சோழநாட்டை உங்களுக்குக் கொடுப்பதற்காக இங்கு வந்துள்ளோம்' என்று கூறினர். கனவு கலைந்தது. தான் கண்ட கனவைத் தனது துணைவி தீபாம்பாளிடம் மன்னன் ஏகோஜி கூறினார். பின், மறுநாள் தனது அரசவையில் காகோஜி (காகாஜி) பண்டிதர் முதலிய அமைச்சர்களிடமும் கூறினார்.

முதல் நாளிரவில், அமைச்சரவை தீர்மானித்த வண்ணம் ஏகோஜி சோழமண்டலத்தின் தலைநகர் தஞ்சையை நோக்கிப் படையெடுத்துப் புறப்பட்டு தஞ்சையை முற்றுகையிட்டுப் போர்புரிந்தார். (அழகிரி நாயக்கருடன்) ஏகோஜியின் போராற்றலுக்கு முன் நிற்கவியலாது மதுரையின் சேனாபதி தோற்று ஓடினான். ஏகோஜியின் படை வென்றது.

போரில் வெற்றிபெற்ற ஏகோஜி தஞ்சை நகரில் ப்ரவேசித்தான். அப்போது தஞ்சை நகரின் அழகைக் கண்டு வியந்தார். "தஞ்சை விண்ணுலகின் தலைநகரான அமராவதியைப்போல் காட்சியளித்தது. அறிஞர்களின் கூட்டம், நீதி, நெறிகளைக் கடைப்பிடித்த மக்கள் கூட்டமாக இருந்தனர். உயர்குடி மக்களின் வீதிகளும், அரச குடும்பத்தினரின் மாளிகைகளும், வணிகர்களின் வாணிப அங்காடி வரிசைகளும், குடியிருப்புப் பகுதிகளும், வரிசை வரிசையாக இருந்தன. விண்ணையும் மண்ணையும் முட்டும் மாடமாளிகைகள், வான்மதியின் வழியையே தடுத்தன. மலைமலையாகக் குவிக்கப்பெற்றிருந்தன தானியங்களின் வகைகள். புலவர்களுக்கும், இரவலர்களுக்கும் அளிக்கப்பெற்ற தானங்களை தாரைவார்த்துக்கொடுப்பதால் ஓடிய நீர் தஞ்சையின் அகழிகளையே நிறப்பின. இவ்வளவு செல்வ வளமும், இயற்கை வளமும் நிறைந்த வளப்புமிகு தஞ்சையைக் கண்டார் ஏகோஜி மன்னர். இந்த தஞ்சைக்குத் தானே பட்டம் சூட்டிக் கொண்டார்.

இந்நிலையில் தீபாம்பாள் கருவுற்றாள். பத்து மாதங்களுக்குப்பின் உரிய நல்ல நாளில் பெரிய சாம்ராஜ்யத்தை அடையும் யோகவேளையில் ஒரு ஆண் குழந்தை பிறந்தான். இச் செய்தியை அறிந்த மன்னன் மகிழ்ந்து அந்தணர்களுக்குப் பல தானங்களைச் செய்தார். மாற்றரசர்களைச் சிறையிலிருந்து விடுதலை செய்தார். பிறந்த குழந்தை வீரமும், அழகும் பொருந்தியிருந்ததால் 'சரபோஜி' என்று பெயரிட்டார். குழந்தை வளர்ந்தான், சப்பாணி கொட்டினான், தளர்நடையிட்டான், மழலைமொழி பிதற்றினான், சிற்றில் சிதைத்தான், பள்ளிப்பருவத்தை யடைந்தான். அனைத்துக் கலைகளையும் கற்பதற்கு உரிய ஆசிரியர்களை நியமித்து கல்வியையும், கலைகளையும் கற்பிக்க ஏற்பாடு செய்தார் மன்னர் ஏகோஜி.

அசைந்துகொண்டேயிருக்கும் இலக்கை அம்பெய்தி வீழ்த்துவும், சக்தி தோமரம் முதலிய ஆயுதங்களைப் போர்களில் பயன்படுத்தும் முறைகளையும், யானையேற்றம், குதிரையேற்றம், ஆகியவற்றையும், இசை, நடனம், நாடகம், முதலிய நுண்கலைகளின் நுட்பங்களையும், காவியம், அலங்காரம், முதலிய இயல் நூற்களிலும் பாரதம்-ராமாயணம் முதலிய இதிகாசங்களிலும், சகுனம், கணிதம், ரத்னபரீக்ஷை, ஓவியம் முதலிய கலைகளிலும் பன்மொழிகளின் பயிற்சியும் பெற்றுச் சிறந்து விளங்கினார்.

வாலிபப் பருவத்தையடைந்த சரபோஜிக்கு இந்த நாட்டை அளித்து பட்டம் சூட்ட விரும்பினார் இவரது சகோதரனை இரண்டாம் ஷாஹஜி மன்னர். ஒரு நல்ல நாளில் இவருக்கு தஞ்சையின் அரசனாக முடிசூட்டினார் மன்னன் ஷாஹஜி.

முடிசூட்டிக்கொண்ட சரபோஜி தனது பட்டத்து யானையான 'சத்ருஞ் ஜயம்' என்ற யானையின்மீது ஆரோகணித்து (பட்டணப் பிரவேசமாகிய) உலாப்போந்தார். பேரி, மிருதங்கம், கொம்பு, சங்கு ஆகியவைகள் ஒலிக்க ஊர்வலம் சென்றது. மக்கள் மனமகிழ்வுடன் வீதியெங்கும் குழுமி நின்றனர். முத்துகளைப் தோரணங்களாகக் கட்டினர். வாழை, கமுகு, கொடி முதலியவை களால் தஞ்சை நகரம் அலங்கரிக்கப்பெற்றன. தஞ்சை நகரமே திருவிழாக் கோலமாகக் காட்சியளித்தது. உலாவரும் மன்னரிடம் மகளிர் காதல் கொண்டனர். உலா நிறைவு பெற்றதும் பட்டத்து யானையிலிருந்து இறங்கிய மன்னர் சரபோஜியை குதிரைப்படைத் தலைவர்களும், வீரர்களும் கரங்குவித்து நின்று மரியாதை செய்தனர். மன்னர் அதனையேற்று, அத்தாணி மண்டபத்தில் நடுநாயகமாகவிருந்த மணிகள் பதித்த சிம்மாசனத்திலேறி அமர்ந்தார்.

வந்திகளும், மாகதர்களும் மன்னனுடைய புகழைப் பாடினர். அவை யில் உரிய இடங்களில் வீற்றிருந்த பலதேசத்துப் பன்மொழிப் புலவர்களால் பாடல்கள் பாடப்பெற்றன. 'சாகித்யபோஜன்' என்னும் பட்டத்தைப் பெற்ற சரபோஜி இவர்களுடைய பாடல்களில் காணப்படும் உவமைகள், அணிநலன்கள் ஆகியவற்றை ரஸித்துப் பலபட பாராட்டினார். அவர்களுக்குப் பல வெகுமதிகளை அளித்து 'அவை கலைய' அனுமதியளித்து அந்தப்புரம் சென்றார்.

சூரியன் அஸ்தமனமும் சந்திரோதயமும் உண்டாயின. மாலையில் செய்ய வேண்டிய நியமானுஷ்டானங்களை முடித்துக்கொண்ட மன்னர், ஆலோசனை மண்டபத்தையடைந்தார். இளவரசர்களும், வருங்காலத்தை நுட்பமாகக் கணிக்கும் அமைச்சர் பெருமக்களும் நாட்டின் நிலைபற்றி ஆராய்ந்து சொன்ன கருத்துக்களைச் செவிமடுத்தும், தன் கருத்துக்கும் இசைய உரிய ஆணையிட்டார்.

மல்லர்களின் வீர விளையாடல்கள், யானை-குதிரைகளின் சாகசச் செயல் கள், நடர்கள், இசைவாணர்கள் முதலிய கலைஞர்களுடன் கலைகளின் நுட்பங் களைக் கண்டும், கேட்டும் களித்தார். இத்தகைய நிகழ்ச்சியில் இரவின் முதல் யாமம்[1] கழிந்தது. அங்குள்ளவர்களிடம் இல்லம் செல்ல அனுமதியளித்த மன்னர் நாட்டியசாலைக்குச் சென்றார்.

அங்கு, தேவமாதர்களை நிகர்த்த பெண்மணிகளின் நடனத்தைக் கண்டுகளித்தார். இதில் இரண்டாவது யாமம் கழிந்தது. மூன்றாவது யாமத்தில் மலரணையில் மங்கையருடன் மருவி படுத்துறங்கினார்.

---

1 யாமம் என்பதன் மரூச்சொல்லே ஜாமம். ஒரு யாமத்திற்கு 4 மணிகள். ஒரு இரவுக்கு 3 யாமங்கள் (மாலை 6 முதல் அதிகாலை 6 மணி வரை)

அவையின் தினசரி நிகழ்ச்சிகள் :

பொழுது புலர்ந்தது. மாகதர்களின் இனிய புகழ் நிறம்பிய இசையைக் கேட்டுக் கண்விழித்துக் காலைக் கடன்களை விரைவிலேயே முடித்துக்கொண்டு ஆஸ்தான மண்டபத்தையடைந்தார். யானைப்படை, குதிரைப்படை, காலாட்படை முதலியவற்றின் தலைவர்களுடன் படைகளைக் குறித்து ஆலோசித்தார். அமைச்சர்களுடன் நாட்டின் நிலை குறித்து விவாதித்தார். கணக்கர்கள் வரவு செலவுகளைக் குறித்து அறிக்கை படித்தனர். அதனை மன்னர் செவிமடுத்தபின் புலவர்களின் பொருளமைதி நிறைந்த பாடல்களைக் கேட்டு மகிழ்ந்தார். வீரர்கள் நிகழ்த்திய சாகசச் செயல்களைக் கண்டும் - கேட்டும் மகிழ்ந்தார். நண்பகல் வரை அரசவை நிகழ்ச்சிகள் நடைபெற்றபின் அங்கிருப்போர்கள் இல்லம் செல்ல அனுமதியளித்து அந்தப்புரம் சென்றார்.

அந்தப்புரத்தில் —

நறுமணம் கமழும் நன்னீர் பல குடங்களில் நிறைத்து வைக்கப் பட்டிருந்தன. சாதுக்களுடைய தூய மனத்தைப்போல் உயர்ந்த பளிங்கு மேடையில் நீராட அமர்ந்தார் மன்னர். தேவமாதர்களைப் போன்ற பணிப் பெண்களினால் நீராட்டப்பெற்று திருநீறிட்டுக்கொண்டு சிவபெருமானை வழிபட்டார்.

நண்பர்களுடன் சேர்ந்து அறுசுவை உணவை உண்டு சந்தன தாம்பூலம் தரித்துச் சிறிது ஓய்வு எடுத்துக் கொண்டார். பின் ஆஸ்தான மண்டபத்தை அடைய ஒரு சிறந்த குதிரையைக் கொண்டுவருமாறு குதிரைக் காப்போனிடம் கட்டளையிட்டார். மிகச் சிறந்த குதிரை கொண்டுவரப்பட்டது. அதிலேறி சபையை அடைந்து சிம்மாசனத்திலமர்ந்தார். புலவர்கள் வாழ்த்தினர். 'திருவுடை மன்னரைக் காணில் திருமாலைக் கண்டேனே' என்று ஆழ்வார்கள் பரவியதுபோல் மன்னர் சரபோஜியை திருமாலுக்கு நிகராகப் பாடிப்பரவினர். இவ்வாறு சிறப்பாக நாட்டையாளும் மன்னர் சரபோஜி மனுநெறிப்படி நீதி தவறாது ஆட்சி செய்துகொண்டு இருக்கிறார். இதைப்போலவே பல்லாண்டுகள் ஆட்சி செய்வார் என்று வாழ்த்தினர் அவையோர்.

சுபம்.

॥ विषयानुक्रमणिका ॥

॥ श्रीः ॥

॥ भोसलवंशावलीचम्पूः* ॥

॥ श्रीरामजयम् ॥

श्रीसीतारमणेन सज्जनपरित्राणाय दुष्कर्मकृ-
त्संहाराय समस्तधर्मचरितस्थित्यै गृहीतं धनुः ।
दत्तं कुम्भभवेन 'पङ्क्तिमुखभित्स्यादि' त्युदीर्णाऽऽशिषा
सोऽयं श्रीशरभोजिराजनृपतेर्दद्याच्छ्रियं[1] निस्तुलाम् ॥

अंभोराशिसुता निजां मणिवरे दृष्ट्वाऽऽकृतिं विंविता-
'मन्यां वक्षसि लालयत्य' यमिति क्रुद्धावतीर्यो रसः ।
पार्श्वे नम्रमुखं[2] स्थिता पदनखे दृष्ट्वा तु विंवं विभो-
र्नम्रोसाविति मानवेगविगमा'ज्जातस्मिता' पातु वः ॥

अंभोधेर्मथने दहंस्त्रिजगतीं जातः परैर्दुर्दमो
देवैर्द्राक्कवलीकृतो बलवता येनैव हालाहलः ।
शैलाधीशसुतापतिः स भगवान्साम्राज्यमव्याहतं
तन्याच्छ्रीशरभोराजनृपतेः सर्वज्ञचूडामणेः ॥

---

* Descriptive Catalogue No. 4240 Burnell's Catalogue No. 5020

1. शरभोजिनृपतिद्वारा भिक्षुकेभ्यः श्रीदानं उचितमिति अत्र षष्ठीविभक्तिरुचितैव ॥

2. क्रियाविशेषणम् ॥

देवश्चन्द्रकलाधरो यदि जगत्सेव्यः प्रमाणं श्रुतिः

तत्सिद्धि यदि तत्प्रकाशनपरास्सन्त्येव चेद्धूसुगः ।

तानेतानपहाय कुत्र निपतेत् श्रीराघवार्यात्मज-

श्रीमद्वेङ्कटनामलाञ्छनकवेः स्निग्धप्रणामाञ्जलिः ॥

वाणीपादयुगं प्रणम्य कलये चम्पूप्रबन्धं कवि-

श्लाघ्यं श्रीशरभोजिराजचरितव्याख्यानमर्थोज्ज्वलम् ।

कन्दर्पप्रमदाकलाब्जकलशी माध्वीकसेकस्फुर-

न्मृद्वीकाफलमाधुरीसहचरी यत्रास्ति वाग्वैखरी ॥

अस्तिप्रभुः कश्चिदशेषलोक-

स्वामित्वलाभेन समस्तसेव्यः ।

जगज्जनन्या जलराशिपुत्र्या

कृतप्रतिष्ठो गृहमेधितायाम् ॥

वर्णानशेषान् वपुषा सिसृक्षोः

क्षात्रं कुलं जातममुष्य बाह्वोः ।

सुधाशनारातिसुदृक्कपोल-

पत्राङ्कुरग्लानिकरप्रतापम् ॥

साहस्रांशवमैन्दवं च महती ये द्वे कुले विश्रुते

तत्र श्रीरघुवंशनाम्नि महिते मित्रान्वये भोसलः ।

राजाऽभूत्सुमतिः समग्रविभवैः आखण्डलप्रक्रियः

क्षोणीरक्षणदक्षिणः क्षितिभुजामग्रेसरः केसरी ॥

उन्मस्तकैर्मानुपलोकभाग्यैः
चितैश्चरित्रैरनघैः प्रजानाम् ।
लक्ष्मीपतिर्भोसलराजनाम्ना
जज्ञे जगद्रक्षणजागरूकः ॥

तस्मिन् कुले शाहनृपालमौलिः
जातः पयोधाविव शीतभानुः ।
नद्धं चिरत्नैर्नवखण्डरत्नै-
र्भुजे वहन् भूवलयं पृथुश्रीः ॥

॥ गद्यम् ॥

शाहजीनृपवर्णनम् ॥

येन किलाऽतुलनिजभुजबलविजितनिखिलरिपुनरपतिमकुटतटखचितविलसदरुणमणिकिरण-निकरनीराजितपादपीठेन, जैत्रयात्राप्रचलितगमनविजितपवनतुरगकुलखरखुरमुखविलेखनसमुल्लसदरणि-धूलीपालीनिर्पातसलिलतया स्थलनिर्विशेषामानीयमानां चतुरर्णवीं कुलगिरितुलितमदकरटिपटलकट-कटाहतट विनिर्गलन्निर्गलदमन्दमदवारिधारानदीमहस्रेणप्रागिव स्थितिमर्ती कुर्वता करदीकृतदिल्लीश्वर-विजयापुराधिपतिगोल्लगोण्डाधिपसेव्यमानेन, कर्णाटकताण्डीरचोलपाण्ड्यचेरमहाराष्ट्राङ्गवङ्गकलिङ्ग-नेपालकुन्तलमागधावन्तिप्रमुखनानादेशाधिपतिमण्डितास्थानमण्डप, व्यञ्जितभुजविक्रमेण त्रिविक्रमेणेव-बलिशासनकुतूहलिना, हलिनेव शौर्यहितसत्वभीमेन, भीमेनेव प्रियधर्मभवविजयि - ना - सत्यजात-गुणविभवेन, भवेनेवदुर्गाधिपत्यलब्धभोगविशेषेण, शेषेणेवाऽच्युतधृतिशालिनापुरुषोत्तमेनाप्यचतुरान-नेन, सर्वमङ्गलावासेनापि गोत्राहितेन, लक्ष्मणेनापि शत्रुघ्नेन, विनतानन्दनेनाप्यहीनेन, दात्रा कवीप्सितानां, आदात्रा पुण्यफलानां, प्रहर्त्रा विमतानां, परिहर्त्रा दुरितानां, उपकर्त्रा मित्राणां अपकर्त्रा खलानां, निखिलानां सद्गुणानामुत्पत्ति भवनेन, विमलविप्रकुलकारितबहुसवनेन कवितिलक कलितनिजापदानेन, साधुचरित पावनेन, प्रज्ञापरिहसित बृहस्पतिमतिविलसितैः

विज्ञात नीतिशास्त्रव्यवसितैः अवज्ञात प्रति(भट)सचिवप्रतिभापाण्डित्यैरनर्घैरमात्यैः परिष्कृत परिसरेण नक्षत्राणामन्तरा क्षपानाथेनेव कुलशिखरिणां मध्यङ्गतेनेव मेरुणा परितः स्थितिमतां बन्धूनां मध्ये परिस्फुरता महाराजेन विश्वमेतत् सनाथीकृतम् ॥

॥ पद्यम् ॥

चोरप्रसङ्गः शुकयोगिसूक्तौ
वात्स्यायनोक्तौ बहुबन्धभेदः ।
कुक्कूरवः कुक्कुटमण्डलेपि
यस्मिन्मही शासति राजसिंहे ॥

यत्तेजोहव्यवाहेश्रितबहुभुवनेब्रह्मणा नाम्बु लब्धं
कुण्ड्यां सन्तापयन्त्यां तदपि विरचितं स्नानपानादिकृत्यम् ।
यत्कीर्तिस्तोमशीतद्युतिकरनिकरप्रद्रवच्चन्द्रकान्त-
ग्रावांचत्सालभञ्जीकरकलशजलैः सत्यलोकस्थितेन ॥

शाहक्षोणीपतेस्तस्यतनया विनयांचिताः ।
नैकाः प्रादुर्भवन्ति स्म मूर्ता वीररसा इव ॥

एकोजिराज वर्णनम ॥

महाराजसुतानेतानतिशेने स्म विक्रमैः ।
एकोजिर्भुविभुर्यस्य गुणा वाचामगोचराः ॥

शाहक्षोणिपतेः सुभक्तिकलितैराराधनैश्शङ्करः
प्रीतः प्रत्युपकार एतदुचितः को वेति सञ्चिन्तयन् ।
नालं सर्वधराधिपत्यमियदित्यालोच्य तत्पुत्रतां
एकोजीन्द्र इति ह्यवाप न यदि श्रीरीदृशी स्यात्कथम् ॥

स्वजन्येन प्रकाशेन मणेरिव महार्घता ।
एकोजिना प्रतिष्ठासीत् सूनुना शाहभूपतेः ॥

एकोजिना शाहनृपालमौलेर्विपद्विमोक्षं बहुसंपदाप्तिम् ।
निश्चित्त्यकुर्वन्तितपांसिभूपास्तादृक्तनूजाधिगमाय तीव्रम् ॥

जाते यज्जैत्रयात्रापटुपटहरवे गाढदत्तार्गलाऽऽसीत्
दिल्ली दम्भोलिपातव्यसुरिव विजयापुर्यधीशोऽपि तस्थौ ।
सस्त्रीको गोलकोण्डापतिरचलमगात् किं परेषां नृपाणां
व्यापारो वर्णनीयः शिव शिव गृहिणीरोगिणः सर्व एते ॥

इत्येवं परिवर्तिते बहुतिथे चोलक्षमाभृच्छनैः
पाण्ड्यैर्निर्जित इत्युरुक्रमपदैः श्रुत्वा हरि(र)त्यत्रतः ।
तद्राज्याधिगमे स्पृहां प्रकटयन्नेकोजिभूमिप्रभुः
तद्रात्रौ शयनीयमेत्य नितरां निद्रां सुभद्रामगात् ॥

॥ गद्यम् ॥

स्वप्नदर्शनम् ॥

तस्मिन् निद्राणे राजनि सर्वलोकहितमाकाङ्क्षमाणाः ब्रह्मादयस्त्रयो देवाः स्वप्ने प्रादुरभवन् आतर्भूतान् ब्रह्मादीन् नमस्कृत्य विनयावनत पार्श्वे स्थितः । तस्मिन्नवसरे सरस्वतीलक्ष्मी-सहितामपर्णामपश्यत् ।

सवितृदुहितृसलिलसमुल्लसच्छैवालनीलेन, मकुटदिनकरवदनहिमकरमध्यविद्योतमानेन, चिकुर-तिमिरसन्तानेन निजां अघटितघटनाशक्तिं प्रख्यापयन्तिं, राकाकोकारिप्रियसखमुखसरोरुहसौरभलोभ-परिभ्रमद्भ्रमरसन्दोहसन्देहसंपादनचटुलकुटिलालकां, अष्टमीचन्द्रमेवाहैवाकसमागततारकामालिका-शीकरमुक्ताललन्तिकामनोहरललाटपट्टां, नासातिलसूनरसास्वादनसमुत्सुकेन, विस्तृतभूलतापक्षयुगलेन,

भ्रमरेणेव मृगमदतिलकेन वदनलावण्यपूरनिरस्तभ्रूलतानीलमणिसेतुमध्यखण्डमतिक्रता वक्रशशन्ध-रोपलाल्यमाननीलोत्पलानुकारिणा नासावंशेन समुन्मिषद्भ्रूयुगदलमध्यविराजमानाङ्कुरशङ्काकर-मृगमदतिलकानुकारिणा परिस्फुरन्तीं, नयनोत्पलप्रेम्णा समागताभ्यामिव शुक्लकृष्णाष्टमीचन्द्राभ्यां जटाबन्धनाभिरूप्यदर्शनकुतूहलिशूलिविहारमणिदर्पणाभ्यां कपोलाभ्यामुल्लसितां, प्रतिहतगजासुरकुम्भ-मौक्तिकनिर्मितताटङ्कयुगलप्रभावव्यञ्जितभर्तृमृत्युञ्जयताप्रतिष्ठां,

वदनवर्ति श्री, वाणि, विलासकमलाभ्यां, मुखलावण्यसरोवरशफराभ्यां मन्तस्मितचन्द्रिकापान-परचकोराभ्यां कर्णावतंसाहपर्यायनीलोत्पलाभ्यां, नयनाभ्यां प्रजासु करुणां वर्षन्तीं, रसनाञ्चल-रङ्गरङ्गद्वाणीपाणीशुकपोषणविनिहितबिंबफल भ्रमकरेण[1] मधुरवचनानुमितगलपञ्जरगतपिकाङ्गनाऽस्वाद-नार्हबालरसालपल्लवेन एकवासः प्रेम्णेवरदनमौक्तिकान्यजहता प्रवालेन मधुरेणाधरेण भ्राजमानां, तपोनिवृत्यै पितृभ्यां मानापनोदनाय पत्युन्नमनक्रियया संभावितचुबुकां, सोदर्यकरशंखसोदरेण रिपुतिमिर-मिहरदसुर (विहरदसुर) समरपरिभ्रमद्वृषकेतुजीवातुमङ्गळसूत्रेण, धरणीधरराजपत्नीस्तन्यकुहरेण दृढतर-परिरंभव्यापृतरमणभुजांगदफणिमणिन्यस्तमुद्रिनेन कण्ठेन दर्शनीयां, तारुण्यसरोवरमृणालाभ्यां समत्सर-स्मरकृतनीलोत्पलदाममयहरकण्ठपाशाभ्यां भुजाभ्यां, नवसमागमसमाकर्षणकरप्रियकरपीडनसहमार्दव-हृद्यतया अद्यापि रक्तिमानं उद्वहद्भ्यां भुजलतानवपल्लवाभ्यां, प्रणतजनाभीप्सितप्रदानप्रभावयशांसि: करजमौक्तिकमिषादिव बिभ्रद्भ्यां पाणिभ्यां विराजमानां, रोमलतास्तवकाभ्यां मुक्ताहारप्रभासुरसरित्को-काभ्यां शङ्कभियेव तनुरमणीयकपयोनिधिनिमग्नाभ्यां पत्रालिपरिष्कृताभ्यां कुलशैलाभ्यां तारुण्य-कासारमग्नकामकलभदरलक्ष्यमानकुंभाभ्यां मनोभवपट्टाभिषेकमणिकलशाभ्यां तनुरङ्गनटनकृत्तारुण्य-श्रीप्रमोदकरस्मरनटतालाभ्यां मुखचन्द्रमान्निध्यमुकुलदर श्री सरसीमरोरुहाभ्यां स्तनाभ्यां शोभमानां, नाभिकासारनिमग्नमदनमत्तगजप्रोत्तिमितशुण्डयेव पश्चाद्भागप्रलम्बिन्या वेण्या पुरप्रतिफलितयेव रोमावल्या कुक्षिस्थितजगत्रयसीमाविभागरेखयेव परिष्कृतावयवां, उत्तुङ्गकुचयुगतिरोहितकरुणाकटाक्षयोगपरीक्षीण-मध्यां, अन्यशुकवाणिश्रोणिस्पर्शसुखानभिज्ञसर्वज्ञां, धरणीरत्नाकरमेखलेन पतिविषयप्रियतरङ्गिणीपुलिनेन

---

1) मूकमपि एवं वदति :-

कलमञ्जुलवागनुमित - गलपञ्जरगतशुकग्रहौत्कण्ठ्यात् ।
अम्ब ! रदनाम्बरं ते बिम्बफलं शम्बरारिणा न्यस्तम् ॥

मूकपञ्चशती - आर्या - ९९.

सुरपतिगजस्पर्धिना (जघनेन), स्मरहरमनोहारिणीरतिमदनलीलोपधानाभ्यां घनजघनद्युतिधुनिप्रवाहद्वय-मतिप्रदाभ्यां नित्यशैत्यकर्कशत्वकलितकदलीकरिकर[1]तिरस्कारकरगुणचारुभ्या मूरूभ्यां, जानुमणिदर्पण-किरणदण्डाभ्यां चरणकमलनालाभ्यां मदनविजयकाहलिभ्यां भाममानां, उपनिषदबलाजनोत्तंस-नीयकुशेशयाभ्यां दिक्पालकामिनीकरकमलसंवाहनसहमृदुताभ्यां आगमतरुकिसलयाभ्यां निजरमणय-क्ष्मरोगशान्त्यै संश्रिताभिः तारकाततिभिः इव नखपङ्क्तिभिः विराजिताभ्यां रेखासरोजकलशातप-वारणादिशुभलक्षणसूचितसर्वेश्वरार्धशरीरभावां, राजहंसगतिमप्यनन्यगतिं अपर्णामपि पत्रावली-शालिनीं, श्यामामपि सूर्याहितसेवां, हरवल्लभामपि कामजननीं, भुवमिव राजशेखरभोग्यां, गङ्गामिव सदाभुवनमान्यां, प्रावृषमिव नीलकण्ठहर्षप्रदां, आश्रितजनवत्सलां अव्याजकारुण्यरक्षित-सकलप्रजां निखिलसुरासुरमकुटतटविकसदरुणमणिकिरणनिकरनीराजितपादपीठां अम्बां भगवतीं भवानीमपि नमस्कृत्य, सस्त्रीकान् ब्राह्मणोत्तमान् विधिदृष्टेन कर्मणाऽभ्यर्च्य तेषु आसनं गतेषु विनयावनतः पार्श्ववर्ती भूत्वा तानपृच्छत् ॥

॥ पद्यम् ॥

सर्वे भवन्तः सस्त्रीकाः स्फुरज्ज्वलनवर्चसः
किमर्थमागता यूयं कुत्रत्या ब्रूत सत्तमाः ? ।
शृणु राजन् प्रवक्ष्यामः चोलभूमिनिवासिनः
राज्यं प्रदातुं तत्तुभ्यं 'विद्ध्यस्मानागतानिति' ॥

॥ गद्यम् ॥

इत्युक्त्वा अन्तर्धानं गतेषु तेषु प्रबुद्धः प्रफुल्लकमलेक्षणः पार्श्ववर्तिनीं स्वप्रेयसीं दीपाम्बायि-नाम्नीं वीक्ष्य स्वप्नवृत्तान्तं कथयन् संपूर्णमनोरथः ॥

---

1) कालिदासमपि एवं वदति :-

नागेन्द्र हस्ता स्त्वचि कर्कशत्वा देकान्त शैत्यात्कदली विशेषाः ।
लब्ध्वाऽपि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः ॥

कुमारसंभवे - प्रथम - श्लो. ३६

॥ पद्यम् ॥

तया स रेजे शिवयेव शंभुः
श्रियेव विष्णुः सरितेव सिन्धुः ।
वाण्येव धाता कलयेव विद्वान्
शच्येव शक्रः क्षपयेव चन्द्रः ॥

॥ गद्यम् ॥

स्वप्नवृत्तान्तं कथनम ॥

तस्य राजन्यचक्रवर्तिनः नृपालमौलेः एकोजीभूपालस्य एवं निवृत्ता रात्रिः ॥

अन्येद्युः पूषण्यभ्युदिते निर्वर्तितप्रातस्सवनकृत्यः सभामभ्येत्य काकोजि[1]प्रभृतिभ्यः मन्त्रिभ्यः स्वप्नवृत्तान्तं निवेद्य परमानन्दयुक्तेषु मन्त्रिषु तद्देशोपगमे प्रयत्नवति राजनि ॥

॥ पद्यम् ॥

यात्रारंभनदत्तुरङ्गनिचयप्रोद्भिन्नपृथ्वीरजो-
व्याप्तं व्योम विलोक्य शत्रुनिवहा लीना गुहामन्धिषु ।
उद्वेलच्चतुरर्णवीकलरवप्रारम्भढक्कारवैः
एकोजिक्षितिपः समस्तविभवैः श्रीमान् प्रतस्थे रयात् ॥

॥ गद्यम् ॥

एवं निर्गत्य तञ्जापुर्युपकण्ठमागत्य तां पुरीं सर्वतो रुरोध । तस्यां रुद्ध्यमानायां पाण्ड्यराजसेनापतिः तां पुरीं विसृज्य वर्षाकालराजहंस इव चक्षुरविषयं गतः । तस्मिन् पलायिते तत्पुरं प्रविश्य तां तञ्जापुरीं विलोकयामास ॥

1) काकोजि = गङ्गाधरमखि ॥

॥ पञ्चम् ॥

तञ्जापुरी वर्णनम् ॥

प्राप्ता धरित्रीममरावतीति
वदन्ति यां सद्गुरुसेवनीयाम् ।
उपेन्द्रयोगात् विबुधानुषङ्गात्
सदा सुधर्मान्वयतश्च सन्तः ॥

यत्राभिजाता वसुधासुधाशाः
न नाभिजातं विधिमाद्रियन्ते ।
धर्मार्थकामप्रवणान् हसन्तो
निर्वृत्तिनिष्ठा नितरां गमिष्ठाः ॥

यद्वासिनां क्षत्रियपुङ्गवानां
प्रत्यर्थिदानं प्रथितं जगत्याम् ।
अकिञ्चनानाममराङ्गनाना-
मपि प्रियाप्त्या तनुहर्षणं यत् ॥

यत्र स्थितानां वणिजां न वीक्ष्या-
ऋक्तोऽस्ति चेत्कोऽपि स यक्षराजात् ।
न न्यूनतामेति गृहं तदीयं
जितालकं यत्सदृशी पुरी का ? ॥

यच्छूद्रसंपादितधान्यराशि-
मभ्रंलिहं चन्द्रमृगं चरन्तम् ।

भो 3

अजानता पान्थवधूजनेन
दीर्घेति रात्रिः बहुनिन्दितास्ते ॥

यत्सौधवीथीस्खलनेन सूतो
रथाद्रवेः निष्पतितो ध्रुवं यः ।
अनूरुरास्ते बहुयोजनानां
उपर्यनुनांशु[1]रथोऽस्य याति ॥

यदीयभूमीश्वरनित्यदान
नीरप्रवृद्धो जलधिः कृतज्ञः ।
तत्सेवनार्थं परिघाच्छलेन
समागतः सन्निधिमातनोति ॥

"पुष्पोद्गमार्थित्वपरा वयं स्मः
नूनं वसन्तः किल युज्यतेऽसौ" ।
इतीव यस्यां कितवाश्च बाल-
प्रसूनुलाव्यश्च मिथो वदन्ति ॥

॥ गद्यम् ॥

तां प्रविश्य राज्यं प्रशासति राजनि महिलारत्नानां अग्रगण्या दीपाम्बा आराधितशङ्करा समये पतिं सेवमाना गर्भमधत्त ॥

---

1. 'अशीतांशुः' इति स्यात् ।

।। पद्यम् ।।

दीपाम्बायाः सत्त्ववर्णनम् ॥

मुखाब्जे पाण्डुत्वं मृदुनि वचने मृत्सुरभितां
उरोजाग्रे नैल्यं कृशिमजुषि मध्ये पृथुलताम् ।
गतौ मान्द्यं तन्व्याः लघु विदधती दौहृदकला
सखीनेत्रज्योत्स्ना व्यरुचिः उरुकीर्तिः प्रसवभूः ॥

धूल्यक्षरग्रहणकृन्मम गर्भ एव
सूनुर्भवेदिति वधूर्विदुषी धृताशा ।
नोचेत् मृदास्वदनतत्परता कथं वा
जायेत भोग्यानिवहे सति गेह एव ॥

गर्भस्थितेन शिशुना पितृभक्तिभाजा
तन्व्याः कुचद्वितयचूचुकनैल्यडंभात् ।
[प्रत्यर्थिभूपनिवहस्य मुखेषु नैल्यं
सम्पादयाम्यहमिति प्रकटीकृतं तु ॥][1]

यशोभरं गर्भजुषः शिशोर्द्राक्-
अमान्तमन्तर्बहिरुल्ललन्तम् ।
वक्त्रस्फुरत्पाण्डिमकैतवेन
वध्वाः वयस्याः परिचिन्त्य हृष्टाः ॥

---

1. मातृकायां ' नोपलभ्यते ' इति पुरितोयं श्लोकः ॥

निर्यात्प्रसुमल्लतामिव वियद्गङ्गां दिवं वारिद-
च्छन्नार्कामिव यामिनीमुदयभूभृद्गूढचन्द्रामिव ।
अन्तर्लीनरसां घनावलिमिव स्वाभ्यन्तरस्थानलां
प्रीतिं प्राप शमीमिव प्रणयिणीं पश्यन् सम्यक्त्वां नृपः ॥

॥ गद्यम् ॥

अदितिरिव उदरकुहरस्थितोपेन्द्रा, कौसल्येव कुक्षिगतश्रीरामचन्द्रा, देवकीव जठराभ्यन्तरगतवासुदेवा, साऽपि देवी गर्भस्थितनरपालबाला नितरामराजत । आनन्द-नवनिमासाद्य पारिजात इव, नारायणवक्षस्थलीमधिगम्य कौस्तुभमणिरिव, राकामासाद्य तारका-पतिरिव, नरपतिसुदतीजठरकुहरमासाद्य नितरां रराज राजशिशुः ॥

एवं कतिपयदिवसेषु गतेषु गौरवनिराकृतवलित्रयमध्यायाः तस्याः देव्याः स्वगर्भ-गतराजबालकभाविसंसूचका मनोरथाः प्रादुरासन् । तथाहि, वलयमात्रवहनाशक्तापि कुलपर्वत, सागर, कानन, संभृतगौरवभूवलयं उद्वोढुं भुजलतायामियेष । पदादेकपदमपि गन्तुमलसापि प्रबलरिपुनृपकुलविजिगीषया भुवनवलयं प्रदक्षिणीकर्तुमभिललाष । पर्यङ्कि-कारोहणदुर्बलापि प्रत्यर्थिदिल्लीशसिंहासनं अतितुङ्गमपि आरोढुमाशामाततान । द्वित्रपदविन्यास-प्रयासप्रवर्धमानस्वेदकणिकाञ्चितललाटापि परिचारिकापरिवीज्यमानव्यजनानलसेवापराङ्मुखी विरोधि-नृपविलासिनीजनविधूतचामरपवनमेव चकमे ॥

शरभोजिराज जननम् ॥

अथ दशमे मासि संपूर्णे शुभदे दिवसे पुण्ये नक्षत्रे शुभे मुहूर्ते साम्राज्य सूचकेषु सर्वेषु ग्रहेषु स्वातीव मौक्तिकं, देवकीव कृष्णं, कौसल्येव रामं, शर्मिष्ठेव पूरुं, दीपाम्बा देवी तादृशगुणसंपन्नं तनयं जनयामास ॥

तस्मिन् कुमारचन्द्रे जातमात्र एव कुवलयमुल्ललास । सामन्तराजकुमार मुखकमलानि मुकुलीभवन्तिस्म । सूनुर्महाराजस्य एकोजिनृपालस्य सागरस्यैव हर्षः प्रकर्षमपि विशेषं पुपोष । तत्कीर्तिचन्द्रिकया दिङ्मुखानि प्रसन्नानि ॥

॥ पद्यम् ॥

'जातः पुत्रस्तवे' ति श्रवणयुगसुधावर्षिणीं विप्रवाणीं
श्रुत्वा प्रीतो महीपः प्रथममुरुभुजोपार्जितं द्रव्यजातम् ।
विप्रायाऽदत्त तस्मै स्मितललितमुखो राजचिन्हैर्विनैव
प्रायः सौख्यं परं किं सुतजननकथाकर्णनानन्दतुल्यम् ॥

कारागृहाद्विमुक्ताः
गगनीभूतं निजं पुरं प्राप्ताः ।
रिपुभूपाः शबरमुखात्
स्वगृहं निश्चित्य विस्मितास्तस्थुः ॥

विजिततरुणार्कभासा
तनुमहसा भूमिपालमणिसूनोः ।
दिवसप्रदीपतुलनां
अगमद्रजनीवशिष्टगृहदीपः ॥

पपौ पयः शङ्खमुखात् नृपाल-
शिशुः मुखाब्जे निहिताज्जनन्या ।
समं शरच्चन्द्रकरावदात
सामन्तभूपालकुमारकीर्त्या ॥

अस्य प्रतीपाः शलभाः भवन्तु
प्रतापवन्हाविति भूमिपालः ।
दिने शुभंयौ धृतिनिर्जिताङ्गं
नाम्ना तनूजं शरभं चकार ॥ [1]

'विपक्षक्षपणोत्साही शरभस्तनयो भवेत्' ।
इत्येव राजा तनयं शरभाभिख्यमातनोत् ॥

उदयगिरितटीव बालसूर्यं
नृपदयिता दधती शिशुं चकाशे ।
तनुमदिव निरासकृत्सपत्न-
निचयनिराकृतिजायमानमोजः ॥

॥ गद्यम् ॥

तदनु शुक्लपक्षचन्द्र इव प्रतिदिनं प्रवृद्धिमधिगते राजसुते कृष्णपक्षनिशाकर इव विपक्षनृपयशोराशिरनुदिनं तनिमानमभजत ॥

॥ पद्यम् ॥

कृतजानु चङ्क्रमणमङ्कणे शिशुं
परिफुल्लगण्डफलकं निशाम्य तम् ।
रिपुभूमिपाः अपि तथैव दुर्गमे
विपिने विचेरुरुपनीततनेजसः ॥

---

1) कालिदासमपि एवं वदति :-

श्रुतस्य यायादयमन्तमर्भक-
स्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थवि-
च्चकार नाम्ना रघुमात्मसंभवम् ॥ — रघुवंशे - तृतीयसर्गे - २२.

क्ष्वेलास्वादनमन्तकप्रशमनं चेतोभवोन्मूलनम्
मातङ्गासुरमर्दनं पुरजयं दक्षाध्वरध्वंसनम् ।
गाथाबद्धमुमापतेः नृपवधूगीतं मुदाऽऽकर्णयन्
डोलामञ्चमधिष्ठितो मणिमयं शेते स्म भूपात्मजः ॥

धात्रीकराङ्गुलिदलान्यवलंब्य गर्भ-
गेहाद्बहिः नृपसुतस्य यदा चचार ।
प्रत्यर्थिराज भवनात् 'कमलाविलासैः'
बाह्यां स्थितिं सपदि पर्यचिनोत्तदानीम् ॥

॥ गद्यम् ॥

शरभोजिराजस्य बालचरितम् ॥

अथ पितरौ अव्याजस्मितरोदनं, अस्फुटवर्णनं, अविशदप्रश्नं, जानुपदसञ्चारव्यवस्थं, अग्राह्यग्रहणबद्धकौतुकं, अभ्यर्थनासाध्यं, अनिवार्यपांसुविकरणं, अविज्ञातपरप्रतरणं, अतिमौढ्यभरितबालचरितं अनुभवन्तौ, अन्योन्यमवलोकयन्तौ स्मितवन्तौ आनन्दजलधेः परां कोटिमगच्छताम् ।

क्रमेण निर्वर्तितचौलादिक्रियाकलापः, गृहीतसर्वभाषालिपिसंकेतः, गुरुप्रसादाधिगतसकलकलः, चललक्ष्यपातनादिधानुष्काणामग्रगण्यः, कृपाणशक्तितोमरप्रभृतिसर्वायुधपरिस्फुरत्करकौशलः, गजहयशिक्षापटिष्ठः, भावरागतालप्रधानभरतशास्त्रमर्मोपदेशदेशिकः, नव्यकाव्यनाटकालङ्कारसरससाहित्यस्तुत्यपाण्डित्यः, विज्ञातमहाभारतपुराणरामायणकथः शकुनपरिज्ञानगणितपरामर्शनरत्नपरीक्षाचित्रविलेखनादिसमर्थः, सततमुरलीपरिशीलनपटुः, कौमारे वयसि एकोजिनृपति कुमारः शरभोजिराजः सकलकलाः संगृहीतवान् ॥

अनन्तरञ्च, सुरेव क्षीराब्धेः कुसुममिव वृक्षस्य गगनप्रदेशस्येव उडुद्युतिरिव शरच्छीतमहसः प्रभाताब्जस्येव प्रबल इव गन्धो धरणिभृत् सुतस्याऽविर्भूतो मदनविधिसृष्टस्तरुणिमा ॥

।। पद्यम् ।।

यौवन वर्णनम् ।।

चिकुरतिमिरः प्रपञ्चः
समेधमानो मुखेन्दुनिकटेऽपि ।
अघटितघटनाशक्तिं
वक्ति शरभराजनृपमौलेः ।।

धर्मैकार्जनतत्परापि युगली श्रीभोसलेन्द्रप्रभोः
अक्ष्णोः श्रुत्यतिलंघनैकचतुरा यत्र श्रिया स्थीयते ।
आवासांबुजशङ्कयाऽनुजनकक्षीराब्धिवीचीधिया
किं वक्त्रे सहजक्षपाकरपरिभ्रान्त्या समाकृष्टया ।।

भ्रूचापौ नयनाशुगौ स्मृतिभुवो खड्गद्वयं बिभ्रतो
गण्डश्मश्रुपरंपरायुगमिपात् श्रीभोसलेन्द्रप्रभोः ।
वक्त्राब्जे भवितव्यमास्थितिमतो कान्ताजनं बाधितुं
वीराणां जयसाधने बहुलता प्रायो न दोषा वहा ।।

चोलभूमिनरपालकटाक्षः
सर्वदा चरणसेवियशोदः ।
अर्जुनोऽपि वृतधर्मजसंपत्
याति कर्णहननात् बहुमानम् ।।

तन्मुखाब्जवसतेः कमलायाः
किं वतंसजलजेन (यन्मधु) ।
तद्गतं मधुकरद्वयमेतत्
तारकायुगलमेव नु लोलम् ।।

दृष्टिः कृष्णासितारुणा प्रकटयन्त्याराल् त्रिवेणिश्रियम्
सद्रत्नाकरमाश्रिता शरभभूकान्तस्य मिन्धेतराम् ।
ये तत्राऽवतरन्ति ते सुकृतिनः किं वा वहु ब्रूमहे
सर्वज्ञाः पुरुषोत्तमाः ध्रुवं अमी वाग्देवतावल्लभाः ॥

श्री भोसलेन्द्रनृपतेः वदनाभिधानो
राजा द्विजालिमतिशुद्धतयान्तरेव ।
पुष्णाति पल्लवरुचेरधरस्य वाह्यं
वासं प्रकल्पयति नीतिपरो हि राजा ॥

नासा महीपतिमणेः नयनाभिधान-
राजीवभाक् जयति मन्मथकेतुवंशः ।
कस्तूरिकातिलककैतवतो यदीय-
छाया चकास्ति नियतं रतिवेणिनीला ॥

नोर्वत्रलावण्यपयोधिवद्धा
विहर्तुमिच्छोरिव मीनकेतोः ।
फेनावदाता पृथिवीशमौलेः
विभूतिलेखा निटिले विभाति ॥

विलोचनानन्दकरत्वतोऽपि
परं महीपालमुखाम्बुजस्य ।
वाचा समस्तद्विजरञ्जनाच्च
विभोर्नियुक्ता द्विजराजताऽस्य ॥

केशैर्ध्वान्तजयात् धनुःपरिभावत् भ्रूभ्यां सरोजस्मय-
ध्वंसात् वक्त्ररुचा निजाधररुचा चूतःप्रवालार्दतः ।

दन्तैः कुन्दनिकृन्तनात् अनुपमा या कीर्तिरासादिता
सा मन्दस्मितचन्द्रिकेव लसति श्रीभोसलेन्द्रप्रभोः ॥

शौर्याविष्कृतनादस्फुरतोः
श्रीपाञ्चजन्यनृपगलयोः ।
स्वरसमरोचितनिनदप्रदता
येन द्वितीयैव तु सा ॥

राज्यश्रियामरिनृपालजुषां हृतानां
वाह्वोर्बलेन सुखवाससिव प्रदातुम् ।
वैशाल्यमेति कनकारदर्शनीयः
श्रीभोसलेन्द्रनृपतेः भुजमध्यभागः ॥

भुजौ प्रभोरर्गलदीर्घपीनौ
भुजङ्गराजस्य धराधरस्य ।
भोगेन साम्यं महता सहेते
प्रधूपदाने जयदानलक्ष्म्योः ॥

रेखासरोजकलशातपवारणादि-
चिन्हप्रकाशितसमस्तधराधिपत्यौ ।
भीताऽभयप्रदतया पुनरुक्तौभूपौ
राज्ञः करौ किसलयाब्जरूपेव रक्तौ ॥

अनधिगतपरवधूटि-
वक्षोरुहशैलयुग्मकाठिन्याः ।
श्रीभोसलेन्द्रनृपतेः
अथापि कुटिला नखा लसन्त्यनघाः ॥

वक्षोवासाभिलाषिप्रतिनृपतिजयश्रीसमारोहणार्हा
सोपानालीव दृश्या त्रिवलिरसिलता रोमरेखा स्मरस्य ।
ऊरू लावण्यभारादिव विधृतमहागौरवौ जंघिके द्वे
चेतो भूकाहलीश्रीवितरणनिपुणे भोसलेन्द्रक्षितीन्दोः ॥

नमद्विमतभूमिभृन्मकुटपद्मरागप्रभा
नवीनदिवसाधिपद्विद्युतिवितानसंमर्शनात् ।
पदांबुजयुगं स्फुरन्निजयशोजितैर्मौक्तिकैः
नखोपधिसमाश्रितं लसति भोसलेन्द्रप्रभोः ॥

तारुण्यपाथोनिधिजायमान-
लावण्यलक्ष्मीललनाद्वयेऽपि ।
गुरोर्नियोगात् अधिभूस्सुभूमेः
उद्युक्तवान् दारपरिग्रहाय ॥

॥ गद्यम् ॥

अथ विवाहितधर्मदारं महोदारं रूपविजितमारं कुमारं धीमन्तं धर्ममिव मूर्तिमन्तं सविनयं अधिगतसकलनयं वितरणनिराकृतराजराजं श्रीशरभोजिराजमहीपालं दक्षिणराज्ये अभिषेक्तुमुद्युक्तवति भ्रातरि शाहनृपतौ ॥

॥ पद्यम् ॥

साम्राज्यपट्टाभिषेक वर्णनम् ॥

काठिण्यं कमठे स्थिरं द्विरसनायोगः फणीन्द्रे कुल-
क्षोणीभृत्सु महत्तराऽतिविषमा शैली दिशादन्तिषु ।

मातङ्गत्वमिति क्षितिः जयरमाप्रेम्णा विहायैव तान्
संप्राप्ता भुजमङ्गदातिलमितं श्रीभोसलेन्द्रप्रभोः ॥

क्षुद्रक्ष्मापतियोगजातधरणीमालिन्यसंक्षालनं
धर्माङ्कुरविवर्धनं प्रशमनं प्रत्यर्थितेजश्शुचेः ।
आनन्दैकनिमज्जनं तनुभृतां पट्टाभिषेकोदक-
ह्लादिनी आदधती तदा प्रववृते श्रीभोसलेन्द्रप्रभोः ॥

भूभृत्पट्टाभिषेकप्रभवजलसरित्युत्थितायां नवायां
हेष्टोऽम्भोधिः विषण्णा सुरसरिदभवत् कुंभयोनेश्च भीतिः ।
धैर्यं धत्ते स भूमिः व्यसृजदुरुमदं स्वर्दिलीपस्य सूनुः
निश्चिन्तो मेघवाहो लवणविगमनत्रासमेति स लोकः ॥

यद्यदस्ति भुवि श्रेष्ठं तत्तद्दानाय पार्थिवाः ।
संम्राज्यमुपतस्थुः तं सर्वराज्यश्रियावहम् ॥

पद्माकरस्य रुरुचे भुवनाभिरामो
हंसैः शरद्यवतरद्भिरिवान्तरिक्षात् ।
प्रत्यर्थिपार्थिवकरांबुजवीज्यमानैः
मूर्तैः स्वकीर्तिपटलैरिव चामरौघैः ॥

श्रीभोसलेन्द्रनृपशेखरवक्त्रलक्ष्म्या
राकानिशाधिपतिरेत्य निराकृतोऽपि ।
सख्यं विधातुमिव तद्वदनेन साकं
श्वेतातपत्रकपटान् विततान सेवाम् ॥

शत्रुंजयं करिवरं कलिताभिषेकः
श्रीरामभद्र इव सत्क्षितिपालमौलिः ।
आरुह्य नागमथ निर्गतवान् ससैन्यो
वीथीप्रदक्षिणविधौ गुरुभिर्नियुक्तः ॥

भेरीशतं काहलिकासहस्रं
मृदङ्गलक्षं बहुशङ्खकोटिः ।
अन्यानि वाद्यानि परस्सहस्रं
अवादयन् वाद्यचणाः तदानीम् ॥

कस्तूरिकागोमयलिप्तवेदिं कर्पूरचूर्णाहितरंगवल्लीम् ।
व्यलम्बिमुक्तामणितोरणाभ्यां प्रभुस्तदा वीक्षितवान् प्रतोलीम् ॥

॥ गद्यम् ॥

तदानीमुदयगिरिशिखरस्थितमिव राकानिशाकामुकं मदगजस्कन्धाधिरूढं अधिगतराजवीथीपथं अश्वसेनापतिसहस्रसंसेवितपार्श्वपुरोभागं वन्दिमागधगणव्योघुष्यमाणनिजभुजापदानं दानविनिर्जितकर्णं कर्णान्तदीर्घनयनं नयनान्तरङ्गरङ्गद्गुणतरङ्गं राजश्रीभोंसलेन्द्रनृपतिं अन्तिकमागतमाकर्ण्य क्षिप्रं तमीक्षितुं अत्युत्सुकानां युवतीलोकानां संभ्रमः समजृंभत ॥

॥ पद्यम् ॥

विभुं दिदृक्षुस्त्वरया व्रजन्ती
विघ्नप्रदं काचित् उरोजभारम् ।
पदद्वयं पल्लवकोमलं च
निनिन्द काचित् नितरां स्वमेव ॥

विलम्बः आदर्शनिचोलमोक्षे
स्यादित्यथान्या मुकुरोपमानम् ।
सखीकपोलं समुदीक्ष्य कृत्वा
कस्तूरिकाचित्रकमाप वीथिम् ॥

राजानं समुपागतं शशिमुखी काचिद् दिदृक्षुर्धृतं
हारं श्रोणितटे बबन्ध रशनां कण्ठे न्यधत्तायताम् ।
लाक्षामक्षियुगे लिलेख पदयोरालिंपति स्मा ऽञ्जनं
पाणौ रत्नं ललन्तिकां अलयत्फालस्थले कङ्कणम् ॥

स्नाता विमुक्तसलिलार्द्रपटा स्वकान्ति
स्वर्णाम्बरं विधृतमित्यभिमान्यमाना ।
द्रष्टुं तमागतमतित्वरयैव काचित्
यान्ती बहिः प्रियसखीनिहितांशुका ऽऽसीत् ॥

भूभृद्भुजो दण्ड[1]निबद्धरेखा-
कस्तूरिकासारमथोत्तमाङ्के ।
कस्याश्चिदक्ष्याख्यचकोरयुग्मं
लग्नं सखव्याधगृहीतमासीत् ॥

मारे पुरारिनयनानलपीयमाने
धात्राऽभिषिक्तमिव काममदःपदेऽन्यम् ।
तं वारिजातनयनाः प्रभुमीक्षमाणाः
कर्णामृतानि वचनानि मिथो वितेनुः ॥

---

1. 'शलाका' इत्यर्थः ॥

कवाटविस्तीर्णमुरोऽस्य राज्ञः
स्तनद्वयं ते पृथुलं तदर्हम् ।
अयि प्रियावास्यधरः प्रवालो
न किं तदास्वादकलौचिती ते ॥

भास्वानयं भामिनि ! पद्मिनी[1] त्वं
श्यामासि[2] राकापतिरुत्पलाक्षि ।
स्वर्तोयमीशश्चपला[3] ननु त्वं
त्वं साधुवाणी[4] चतुराननोऽसौ ॥

कृतानि पुण्यानि कियन्ति भूम्या
याऽमुष्य बाहुं भजतेऽर्गलाभम् ।
सा वीरसूः याममसूत शूरं
स कीर्तिमानस्य विभोः पिता यः ॥

॥ गद्यम् ॥

अथ पुराङ्गनाजनविकीर्यमानपुष्पाञ्जलिसुरभिलराजवीथीपरिसरं पुरं प्रदक्षिणीकृत्य-स्वावरोधवधूकुचकुंभसारकमस्तकधारिणः करिणः स्कन्धात् अवरुह्य तुरगमादिकोटिप्रणामाञ्जलि-कमलकुड्मलानि अनुभवन्, आस्थानमण्टपमध्यमणिमयसिंहासनाधिरूढो वन्दिगणपठितानि महार्थमहितानि निरवद्यानि पद्यानि अश्रौषीत् । तथा हि —

अम्भोधौ कति वा न सन्ति मणयः चिन्तामणेः किं समाः
ते, ज्योतींषि कियन्ति सन्ति गगने नान्यर्कतुल्यानि वा ।

1. पद्मिनीजाति संभवा कमलिनी च ॥
2. यौवनमध्यस्था रात्रिश्च ॥
3. चपला विद्युत् लक्ष्मीश्च ॥
4. चतुरवाक् सरस्वती च ॥

भूमौ वा कति सन्ति भूमिपतयः किं ते समाना गुणाः
श्रोणीरत्नवितानरोहणगिरः श्रीभोसलेन्द्रप्रभोः ॥

चिन्तारत्नं सजीवं यदि सुरतरुणा जंगमत्वं धृतं चेत्
श्रीदश्चेत् दिक्पतीन्द्रः न यदि विधिकृतं कामधेनोः पशुत्वम् ।
चन्द्रो लुब्धावतंसो न यदि रविसुतो दानशीलस्सदा चेत्
मेघो वीताशनिश्चेत् त इह वितरणे चोलभूपालतुल्याः ॥

पृथ्वीचक्रालवाले वितरणसलिलैराप्लुते वर्धमाना
मेरूपघ्नं श्रयन्ती दिशि दिशि नितरां व्यापिनी कीर्तिवल्ली ।
प्राश्चत्तारप्रसूना वियदलिपटला व्योमगंगाख्यमाध्वी
भूरा ज्योत्स्नापरागा शशिफलजननी राजते भोसलेन्दोः ॥

श्रीभोसलेन्द्रक्षितिपालमौलेः
प्रतापलक्ष्मीमधिगन्तुमिच्छुः ।
देवालयस्याऽनिशं अब्जबन्धुः
प्रदक्षिणः प्रक्रमणं करोति ॥

॥ गद्यम् ॥

जय जय जगत्पते शरभोजिनृपते 'कवयो वयं अस्मद्रचितपद्याकर्णनेन अनुगृहः क्रियतां क्रियतामि'त्यनवद्यानि पद्यानि अपठन् ।

॥ पद्यम् ॥

सेवाहेवाकनम्रप्रतिनृपतिततिस्वर्णकोटीरकोटि-
स्थितरत्नश्रेणीतपद्मरागारुणकिरणगणस्फुरत्पादपद्मः ।

दुष्टाग्निप्राणवायुग्रसनपरिलसत्खड्गकृष्णाहिराज-
द्राहापाठीरशाखो जगति विजयते चोलभूपालचन्द्रः ॥

मन्थानाचलमथ्यमानपृथुलक्षीराब्धिवीचिच्छटा-
श्रीसन्ध्याधिकटाक्षपातवितरत्संपद्धनैः सज्जनैः ।
मूर्तो वीररसो न हन्त! तनुमान्धर्मो नु पुण्यं भुवः
किं रूपीति वितर्कितो विजयते श्रीभोसलेन्द्रप्रभुः ॥

रूप्यामरस्वर्णशैलत्यरुणकिरणधोदायिरूपैः प्रतापैः
स्वर्णाद्री रूप्यशैलत्युडुपतिसदृशस्वच्छमूर्त्या च कीर्त्या ।
ईदृक् ते धातुवादः क्व नु विचित इति प्रौढधीरानुयोगे
हासादत्तोत्तरोऽसौ जगति विजयते चोलभूपालचन्द्रः ॥

॥ गद्यम् ॥

तदनु गौडवैदर्भपाञ्चालरीतिप्रयोगचतुराः नवीनकविवराः इति विज्ञप्तौ दाक्षिणात्यः कविसार्वभौमः कश्चित् उत्थाय श्लोकमेकं पपाठ ।

॥ पद्यम् ॥

संरक्षन्निगमं तथाऽचलतया ख्यातः क्षमावान् श्रुतः
प्रह्लादो बलिजित् कृतार्जुनयशोवृद्धिः च रक्षोदयः ।
दाता भानुभुवः सदाप्तविजयो वृत्तैः कलिं वारयन्
व्याख्यात्येप हि चोलभूमिरमणः श्रीशाश्वतारान्दश ॥

॥ गद्यम् ॥

ततः साहित्यभोजः स महाराजः तस्य कवेः सन्दर्भशुद्धिं अर्थोत्कर्षश्लेषवैचित्र्यं च अभिनन्द्य निरवधिकमैश्वर्यं ददत् । अन्येषां कविबुधवन्दिनां अभिलषिताधिकप्रदानात्

गरिष्ठां प्रतिष्ठां प्राप्तः समधिकसमभाजनानां ग्रहगमनायाऽनुमतिं कुर्वन् दौवारिकनिवारितानुगतजनो निजावरोधमासाद्य करेणुभिरिव गजेन्द्रो पद्मिनीभिरिव मारसः अभिरामाभिः सह रामाभिः दिवसमशेषमनयत् ।

अस्तमनवर्णनम् ॥

तदानीं अस्तगिरिशिखरस्फुरत्कंकेलीतरुकोरकसमकरे दिनकरे ईर्ष्याकुपितकामिनीशोणदृक्कोणकान्तिसंक्रान्तिजनितरक्तिमविसरे प्राचीयोगस्मरणकोपारुणमुखदीधितिर्वाच्या प्रतीच्या, यावकरससिक्तचरणकमलताडनेनेव शोणिमानं उद्वहति मिहिरे जलजबन्धुतया पारावारजलमानुषराजकन्यावदनसरोरुहविकासनायेव तत्र गाढमवगाढे पतिवियोगदुःखविगलदञ्जनमिलदश्रुबिन्दुसन्दोहसन्देहकृत्पटलपञ्जिर्णामुखे सरसीरुहे सङ्कुचति परस्परविनिहितदुस्त्यजचञ्चुबिसकाण्डनिरुद्धनिर्गमप्राणे विघटमाने चक्रवाकमिथुने ज्वलिष्यत्कोकशोकपावकप्रभवधूमेष्विव अप्रतिहतप्रसरेषु तिमिरेषु, निरन्तरगमनजनितश्रमखिन्नरविरथतुरगफेनस्तबक, कदम्बकसन्देहकारिणि गगनपथपरिष्कारिणि तारकानिकरे, देशान्तरगतदयितसमागमानिश्चयात्यक्तद्वारदेशासु. प्रोषितपतिकासु सनिश्वासंप्रतिनिवर्तमानासु, निश्चितप्रियागममासु वासकसज्जिकासु स्वकेलीमन्दिरालङ्करणसज्जासु, कामिनी वदनचन्द्रसेवार्थं समागतासु तारकास्विव दीपिकासु प्रतिभवनं विद्योतमानासु, सायन्तनसवनहुतवहज्वालावितिमिरेषु आग्न्यागारेषु गगनसरःकुमुदायमानेषु तारकावितानेषु, कुपितमानिनीमानापनोदनसमुत्सुकपतिसन्देशहारिणीषु दूतीश्रेणिषु, कृतनीलांशुकावकुण्ठनासु संकेतगृहमधिगन्तुकामासु अभिसारिकासु, मानिनीमानपिशाचोच्चाटनमन्त्रायमाणे मदनधनुर्ज्यानिनादे ॥

॥ पद्यम् ॥

कामेश्वेतातपत्रं गगननलसरोराजहंसः त्रियामा-
श्रीलीलापुण्डरीकं प्रथमगिरिशिरोधार्यमुक्ताकिरीटम् ।
देवानां भुक्तिपात्रं रजतविरचितं चन्दनामर्दगौर-
ग्रावा प्राचीमृगाक्ष्याः व्यलसदुडुपतिः चोलराजस्य मित्रम् ॥

अंभोराशिविवर्धनं कुमुदिनीसंप्रीणनं पद्मिनी
सौख्योत्सादनं अन्धकारमथनं कोकव्यथोन्मीलनम् ।
क्रुद्धांभोजमुखीधृतिप्रशमनं कान्ताभिसारोल्लल-
त्संलापभीतिविमूर्च्छनं च कलयन्निन्दुः जजृंभे दिवि ॥

प्रेमैकास्पदरोहिणीस्तनतटीगाढोपगूहालग-
त्कस्तूरीप्रतिभाप्रदाननिपुणश्यामस्फुरल्लाञ्छनः ।
आदित्याशनरूप्यभाजनं अतिस्निग्धांकगारुत्मत-
ग्रावालंकृतमध्यमिन्दुरुदयं दत्ते स्म नेत्रोत्सवम् ॥

कुवलयहितकृति राजनि
उदयगते सत्प्रमोदकरे ।
अतथाविधस्य नाशे
कोककुलश्च परस्पर दुःखमगात् ॥

॥ गद्यम् ॥

तस्मिन्नेव समये स महाराजः सायन्तन नियमानुष्ठान शुद्धान्तःकरणः शुद्धान्त-वधूजनकपोलतलदर्पणे एव संक्राङ्कुचितानि स्वावयवालङ्कृतानि प्रसाधनानि परिहृतप्रसाधिका करादर्शावलोकननादरं अवलोकयन्, अवरोधात् परिचारिका सहस्रकरदीपिकादर्शितसरणिः विनिर्गमन्, सवयोभिः प्रभुकुमारैः प्रागेव अधिष्ठितमास्थानमण्डपं आसादितवान् ॥

॥ पद्यम् ॥

डिल्लीक्षोणीशमुख्यः क्षितिपतिनिवहोदन्तलेखार्थविज्ञ-
प्रज्ञावज्ञातवाचस्पतिसचिववचोनिश्चितात्मीयकृत्यः ।
वीरैर्मल्लैः कवीन्द्रैः गजहयनिगमज्ञैः नटैर्गायकैश्च
क्ष्माभृत् सिंहासनस्थो निशि सह कथयन् याममेकं निनाय ॥

॥ गद्यम् ॥

तदनु सिंहासनादवतीर्य सभागतानां सर्वेषां गृहगमनायाऽनुमतिं वितीर्य नाट्यशालागतो रूपनृत्तविजिताप्सरसां वारतामरसाननानां नाट्यावलोकनसुखेन द्वितीयं याममनयत् । तृतीये यामे शुद्धान्तगतः स्निग्धान्तकरणाभिः विज्ञातकामागमोक्तकरणाभिः तरुणीभिः करेणुभिरिव गजेन्द्रः स महीमहेन्द्रः समं अरमत ॥ तदानीं खलु :-

॥ पद्यम् ॥

हठाश्लेषे वाहौ पिहितकुचकुंभाऽधरसुधा-
रसास्वादेतिर्यग्विवलितमुखिनी व्यवहृतौ ।
शपन्तीचित्तेन स्फुटरुचिभरां दीपकलिकां
नवोढा हीभीभ्यां अतनुत सुखं पत्युरवशा ॥

मामेत्यालपितेऽपि पीनजघनव्यापारमन्यादृशं
'मां मुञ्चे'ति वचस्यविश्लथकथाहीनं परीरंभणम् ।
मन्दं मन्तमितीरितेऽपि नितरां भ्रूवल्लिकातर्जनं,
मध्यायाः पतिरन्वभूत् मृगदृशः क्रीडाविधौ तादृशे ॥

पुंभावं परिपणितं
द्विवसद्यूते जये प्रौढा ।
आगतमालोक्य
पतिं स्मारयति स्मरापत्रसंव्रीडा ॥

॥ गद्यम् ॥

एवमनेकासु नायिकासु अवैषम्येण स्नेहानुवर्तनमातन्वानः । तत्प्रेमभरानुभावैः कृतार्थमात्मानं मन्वानः कामभोगाननुभवन् । निर्विघ्ननिद्रासुखो ब्राह्म एव मुहूर्ते लब्धबोधः चोलपतिमहाराजः सत्वगुणोत्तरतया शुभमतिः एवं अचिन्तयत् ।

'चतुर्विधेषु भूतसर्गेषु मानुषं जन्म दुर्लभम् । तत्रापि एकातपत्रत्वं जगतः प्रभुत्वं दुर्लभतरम् । तस्मिन्नपि महाकुलीनतौज्वल्यमहाभाग्यौदार्यतेजस्विताविदग्धताधार्मिकत्व-पाण्डित्यप्रभृतिसुगुणवत्ता दुर्लभतमा ।' तदेतत् सुगुणजातं धर्ममूलं! स च वर्णाश्रमानुगुण-देव-ब्राह्मणसमाराधनप्रभावः! विशेषतः, क्षत्रियस्य धर्मार्जनं 'शौर्यं विना न घटते! तद् अकरदा एव जेतव्या' इति निश्चितकर्तव्यस्य महाराजस्य प्रबोधनार्थं माङ्गलिकप्राभातिक-वाद्यविशेष सनाथं बाह्याङ्कणं अतिक्रम्य द्वारदेशमधिष्ठितानां सूतानां कर्णामृतसेचनानि वचनानि शुश्राव ॥

जय जय जगत्पते चोळभूपते सुखाय ते प्राची सन्ध्या भवतु देवस्य । इहहा —

सूर्योदयवर्णनम् ॥

॥ पद्यम् ॥

अङ्कूरद्युतिमान् पुरन्दरदिशासीमन्तिनीनासिका-
मुक्तारत्नं अपश्चिमाचलनदीप्रोढ़ीमहंसीशिशुः ।
पद्मोपद्रवकारिणो मम शुचं कुर्यादुदेष्यन् रविः
नाहं स्थातुमिहेति शीतकिरणः संलीयतेऽस्ताचले ॥

कोकव्याधिचिकित्सकः कुमुदिनीदर्पाब्धिकुंभोद्भवः
द्वीपोद्वीपगणप्रकाशनचणः पाथोजसौवस्तिकः ।
ध्वान्ताख्यासुरचक्रं ऋक्षविततेः हंसो विसानां रविः
तूर्यो विग्रहवानपश्चिमगिरेः राज्ञः किरीटायते ॥

हर्षं पद्मवनी प्रयाति कुमुदिन्यास्ते भृशं दुःखिता
शोकं कोककुलं जहाति विपदं धत्ते चकोरावलिः ।
भास्वानेत्युदयं रसातलगतश्चन्द्रोऽस्तमासेवते
नैयम्यं सुखदुःखयोः शिव शिव क्वापि स्फुरन्नेक्ष्यते ॥

अस्तंयातु निशाकरो विधिहतः त्वद्वक्त्रमालम्बताम्
लोकानन्दकरत्वमुत्पलवनी निद्रां चिरं सेवताम् ।
निर्निद्रे सरसीरुहे विहगतः त्वन्नेत्रतुल्या मुदा
भृङ्गाली किमभावतः क्षितितले किं वा परं हीयते ॥

स्वोन्मेषासहराजमण्डलतिरस्कारप्रदोजायिभिः
पद्मोल्लासकरैः करैः कुवलयश्रीवर्धनेऽतत्परः ।
कुर्वाणोऽलघुसाधुचक्रहितकृत् दूरेस्थितीं तामसीं
संप्राप्य त्वमिवोदयं विलसति श्रीचोलभूमिप्रभो ॥

अस्तं गच्छतु नाम शीतमहसो ज्योत्स्ना जगल्लोचना
नन्दन्नी विदधाति कीर्तिरनघा पद्मानुकूल्योदिता ।
शान्तिं नाम भजन्तु दीपकलिकाः वाहाप्रतापस्तव
स्नेहं संपरिवर्धयन् विलसति श्रीचोलभूमिप्रभोः ॥

तिष्ठन्त्यञ्जलिपाणयो वसुमतीनाथाऽतिरुद्धाः बहिः
कक्ष्यायां भवदीयवीक्षणसुधावीचीप्रतीक्षान्विताः ।
तानेतान् अवलोकयाऽद्यितनयावासारविन्दीभव-
न्नेत्रप्रान्तनिरीक्षणेन नृपते निर्वृत्तकाल्यक्रियः ॥

केलीपञ्जरवान्दिराः शुकवराः त्वद्बोधनार्थोदिता-
न्यस्माकं वचनानि साध्वनुवदन्त्येतान्यशेषाण्यपि ।
किं तेषां प्रतिभामहत्वं ? अथवा, तत्पोपकाणांमह-
द्वंदग्ध्यं ननु ? तत्ववित् त्वमसि भोश्रीचोलराजप्रभो ॥

कुक्कुटकाकमयूरप्रमुख -
शकुन्ताः प्रबोधयन्ति जगत् ।

उच्चावचैः निनादैः प्रभुमिव
 मृताः सुचेतनामुदिताः ॥

॥ गद्यम् ॥

सभायां कार्यक्रमः ॥

इत्थं प्रभुगुणस्तुत्याऽऽनन्दिनां वन्दिनां वचनान्याकर्णयन् कमलाकर इव निर्निद्र-नयनांबुजः श्रीशरभोजिराजः चोलपतिमहाराजः निर्वर्तितप्रत्यूषकृत्यः परिगृहीतप्रातरास्थान-योग्यप्रसाधनः शुद्धान्तान्निर्गम्य बाह्याङ्कणनिरुद्धान् अवनतशिरस्कान् उत्तम्भितपाणिपल्लवद्वयान् अवनीपालान् अमलपयः पारावारोत्तरवीचीकचाकचिकलहविचक्षणैरीक्षणैः अनुगृह्णन् आस्थान-मण्डपसिंहासनं अध्यारुरोह ।

उदयाद्रिगते भानौ इव सिंहासनस्थिते ।
नृपतौ प्रकृतिस्सर्वा पद्मिनीव मुदं ययौ ॥

तदनुगजतुरगपदादिभटाध्यक्षश्रावितस्वपाल्ययोगक्षेमः, सचिवविज्ञापिततत्तद्राजकृत्यः गणक-मुख्याधिकारिवाचितायव्ययाकर्णनदत्तकर्णः विद्वज्जनसुभाषितनिश्चितसर्वशास्त्रतत्वः कविवरसूक्तिनिर्धारित-शब्दार्थगौरवः, गायकनटवाग्भिः भरतगीतशास्त्रमर्मज्ञः भटमल्लसल्लापैः श्रेष्ठं वीररसं मन्वानः पीठमर्दविटचेटविदूषकोक्तिभिः शृङ्गारहास्यरससौख्यमनुभवन् आमध्याह्नं आस्थानमण्ठपस्थितिं आततान ।

तदानीं वन्दिद्वयं आगत्य श्लोकं पृथगेकं माध्यन्दिनं चरितं अधिकृत्यापठत् ॥

माध्यन्तिन वर्णनम् ॥

॥ पद्यम् ॥

सेवन्ते पथिकाः करैर्दिनकृतः छायाद्रुमं पीडिताः
 दारिद्र्येण कृतार्दना इव बुधाः स्वं दानकल्पद्रुमम् ।
मध्ये व्योम्नि विराजते दिनकरः सर्वैरपि प्राणिभिः
 दुष्प्रेक्ष्यस्त्वमिवाऽऽजिमध्यवसतिः प्रत्यर्थिभूमीश्वरैः ॥

पिबति किरणजालं भानवीयं नदीनां
सलिलमतितृषार्तं नूनमर्धे दिनस्य ।
शरनिवह इव त्वच्चापमुक्तोऽरिसेना-
रुधिरमुरुपिपासाव्याकुलो युद्धमध्ये ॥

॥ गद्यम् ॥

अथ सिंहासनादवरुह्य विसृष्टसकलसभाजनो सुरभिसलिलपूर्णभाजनोपेतां स्नानभूमिं सुशीतां समासदत् ॥

॥ पद्यम् ॥

मन्मानसमिवाऽत्यच्छं तत्र स्फाटिकमासनम् ।
आरूढवान् स भूपालः राजहंस इवाम्बुजम् ॥

दूरोत्सारितवलयैः
अंशुकदृढबद्धतुङ्गवक्षोजैः ।
उक्तं सितालकान्तैः
जलकलशा जगृहिरे वधूरत्नैः ॥

श्यामास्ता विलसद्धाराः
कादम्बिन्य इवानघैः ।
सलिलैः स्नापयामासुः
महागिरिमिव प्रभुम् ॥

स्नातो दुकूलहृतकेशभरार्द्रभावः
क्षीराब्धिफेन धवलाम्बरयुग्मधारी ।
उष्णीषवान् निटिलचारुविभूतिरेखो
गौरीशमार्चयदयं विधिवच्चिराय ॥

॥ गद्यम् ॥

तदनु मृगमदकर्पूरकुंकुमयोगविशेषसुरभिना, तुहिनसलिलसेकेन शीतेन चन्दनेन अनुलिप्ताङ्गो मल्लिकामतल्लिकाकुसुममालिकासुरभिलोष्णीषबद्धो भोजनसमयोचितभूषणपरिग्रहो बन्धुभिस्सह अभिमतरसास्वादनप्रवृद्धमानमितिः शरभोजिमहाराजो आहारविधिं निरवर्तयत् ॥

॥ पद्यम् ॥

भुक्त्वोत्थितः सलिलकल्पितदेहशुद्धिः
हस्ताभिमृष्टपटवासशिः तनुः स राजा ।
कुर्वन् शनैश्शतपदीक्रमणं वितन्वन्
ताम्बूलचर्वणमगात् शयनीयमेकम् ॥

॥ गद्यम् ॥

तत्र शयनीयतले निषण्णो रूपविजितमेनकया कया नवनलिनकोमलेन करयुगलेन संवाह्यमानचरणकमलः तत्कालोचितदर्शनीयैः मित्रैः अमात्यैः अवनीपतिभिश्च स महाराजः तास्ताः कथाः कुर्वन् कञ्चित्कालं नीत्वा 'स्वाधिरोहणोचितं तुरगं आनय, इति अश्वपालक आदिशत् ॥

॥ पद्यम् ॥

अश्ववर्णनम् ॥

वृषभगरुडहंसारोहणे नव वाञ्छा
हरसुरहरवाणीवल्लभानां भवित्री ।
यदधिगमदशायामश्वरत्नं तदारा-
दनयदथ समीपं सः क्षितीशस्य तस्य ॥

श्रीचोलराजविभवे ददताऽश्वरत्नं
येतन्महांबुनिधिना ननु वञ्चितोऽस्मि ।
उच्चैश्श्रवा न सदृशोऽस्य बतेति शक्रः
खेदं भजिष्यति तदक्षिपथे यथि स्यात् ॥

पुरुषेष्वधिको हरिः तदीयं
जवतश्चित्तमवैति येन पीतम् ।
मुखफेनमिषेण शीतभानुः
पितृभक्त्येव यदाससाद तस्य ॥

जवनेन जित्वा पवनं तदीयं
महाबलत्वं हृतमेव तेन ।
नोचेत् सशैलाब्धिवनक्ष्माभृ-
द्भुजं कथं भूमिभुजं बिभर्ति ॥

मुखलीनखलीनसर्पयोगात्
अपि काले पुरुषोत्तमस्य धृत्या ।
कलयन्निजतार्क्ष्यनाम सार्थं
ददृशे तेन हयोत्तमस्य राज्ञः ॥

गतिनिरोधजरोषसमुद्भव-
च्छ्वसितकैतवतो यदुपासनाम् ।
जवजितपवनोऽतनुत प्रभोः
स तुरगो विदधे महतीं मुदम् ॥

॥ गद्यम् ॥

तं उभयतस्स्वर्णखलीनकटकावलम्बिकठिन पाणिभ्यां, पदेपदेकृतगतियत्नविशेषाभ्यां, उभाभ्यां, आकृष्यमाणजवमानं पुरुषाधिकहेषारवपूरितसकलभुवनोदरविवरं, सुमेरुमिव देवमणिधरं, वसन्तमिव परिस्फुरत्केसरं, महोदधिमिव महावर्तप्रवालं, यतिनमिव गीतामृतश्रुतिकौतुकं, अवरोधवधूस्तनमिव विलासधरं, जवजितपवनमपि सदागत्युत्सुकं गरुडगमनासहमपि तार्क्ष्य-पदाभिधेयं अनघलक्ष्मणोपेतं तुरगवरं आरुह्य वदनश्रियं प्रार्थयमानेन सन्निहितेन राकानि-शाकामुकेनेव कनकमयदण्डेन धवलातपत्रेण निवारितातपः पार्श्वद्वयस्थितपरिजनधूयमानचामर-पवनचलदुष्णीषशेखरमौक्तिकः संख्यातितुरगसैन्यशोभितोभयपार्श्वः अहमहमीकापतत्प्रणामाञ्जलिभिः संसेव्यमानो वीथीप्रदक्षिणं अतानीत् ॥

॥ पद्यम् ॥

यद्भोंसलेन्द्रनृपराज्यविलासचिन्हं
    यच्छायया क्षितिरियं विजहाति खेदम् ।
चित्रेण तेण कृतलक्ष्मणि भोंसलेन्द्रे
    मुक्तातपत्रविभवः सुहृदप्ययंश्च ॥

कुर्वन्तु नीराजनमब्जनेत्राः
    सर्वैः नरेन्द्रैः अनुसेवितस्य ।
श्रीभोंसलेन्द्रस्य गुणाकरस्य
    प्रतापनीराजितदिक्चयस्य ॥

॥ गद्यम् ॥

इति कृतनीराजनाभिः पुरन्ध्रीभिः लोचनयुगलैः संपीयमानो नगरद्वारमागत्य अवनतशिरस्कानवनीपतीन् गृहगमनाय अनुमतिंकुर्वन् तुरगादावरुह्य महास्थान्यां सिंहासने निविश्य जगद्रक्षणजागरूकः विष्णुरिव अनुदिनं जगत्पालयन् तिष्ठति ॥

॥ पद्यम् ॥

दशावतार कथनपुरस्सरं शरभोजि वर्णनम् ॥

लक्ष्मीवीक्षणलक्ष्यमूर्तिरखिलाः रक्षन् प्रजा वृष्टिभिः
संत्राता निगमस्य सोमकमलं तन्वन् मुखेनाऽऽहृतम् ।
प्रख्यातां भुवने स्थितिं प्रकटयन्नाद्यावतारश्रियं
वीरश्रीशरभोजिराजनृपतिः पुष्णाति विष्णोरमौ ॥

सारस्वते घनरसे कलितप्रतिष्टः
प्रख्यातगोत्रवहनात् सुमनोभिनन्द्यः ।
प्राप्तप्रभावसुधया शरभोजिराजः
श्रीकूर्मवच्छिवगुणः श्रुतिसारवेदी ॥

उद्यत्तटस्थभिदमुत्कलिकागहस्रं
व्याप्तं विधूय जलराजमियाऽऽदिपोत्री ।
श्रीचोलभूमिरमणः शरभोजिनामा
विश्वंभरोद्धरणमातनुते विधीड्यः ॥

"भिन्दन् स्तंभमुरुं हिरण्यकशिपुं क्षेत्रप्रदाता श्रुत-
प्रह्लादोत्सवकृन्नृसिंह" इति तां ख्यातिं गरिष्ठां भजन् ।
निर्बाधां विबुधस्थितिं विरचयन् चित्रैः विचित्रैः क्रमैः
वक्ति श्रीशरभोजिराजनृपतिः वृत्तिं तुरीयां हरेः ॥

मन्युप्रवृद्धबलिनिग्रहणं बुधश्री-
कृष्टिक्रमं विततकीर्त्यमरोपधाप्ति ।
चित्रं चरित्रमनघं शरभोजिनाम्नो
विष्णोस्त्रिविक्रमतया प्रतिमस्य तुल्यम् ॥

लब्ध्वा सत्प्रभुशेखराच्छुचिभुवः श्लाघ्यं च धर्मागमं
सत्वश्रीकृतवीर्यजार्जुनयशः संवर्धयन् साधयन् ।
शास्त्रोत्कृष्टतया पदे कृतपदः सारस्वते स ददृशे
श्रीमान् श्रीशरभोजिराजनृपतिः यात्याद्यरामश्रियम् ॥

कल्याणं सुमणोगणस्य कलयन् रक्षोपकारार्थिनः
कुर्वन्नात्मविभूषणं मनुकुलं राजत्सुमित्रात्मजः ।
नित्यं भारतवृत्तिराजितनयः श्रीसेव्ययोध्याश्रयात्
श्रीमान् श्रीशरभोजिराजनृपराड्रामाकृतिः दृश्यते ॥

पुष्णन् राजकुलोदयं रविसुता सौख्यप्रदानोज्वलः
शौर्याधिक्ययसमश्चितः प्रकटिताऽनन्दः पृथक्कर्मणा ।
व्याकुर्वन् बलभद्रतां सुमहतीं बिभ्रद्विजेन्द्रश्रियं
श्रीमान् श्रीशरभोजिराजनृपराट् रामस्त्रितीयो यथा ॥

सद्वृन्दावनकौतुकी धृतमहीभृत् गोसुखं कल्पयन्
कुर्वन् राजकुलं सता बलवता स्वेन प्रतिष्ठाञ्जितम् ।
उन्मीलद्वसुदेवहर्षसभितः संवर्धयन् धर्मज-
क्षेमाण्यद्य हि चोलभूमिरमणः श्रीदेवकीपुत्रनि ॥

विष्णुयशोजाततया
कलिनिग्रहकृत् चरित्रयोगाच्च ।
कल्कीव भाति भूमौ
भोसलकुलशरभशौरिरयम् ॥

संरक्षन्निगमं सुगोत्रवहनो व्यक्तक्षमः संश्रित-
प्रह्लादो बलिजित् कृतार्जुनयशोवृद्धिश्च रक्षोदयः ।
संप्राप्तो बलभद्रतां विजयवान् जेता कलिं चर्यया
व्याख्यात्येष हि भोसलेन्द्रनृपतिः श्रीशाबतारान् दश ॥

॥ गद्यम् ॥

इति भगवदवतारतया कवीन्द्रैः वर्ण्यमानो विद्वद्भिः आचन्द्रतारकं 'विजयस्वे'ति त्रिसन्ध्यं प्रार्थ्यमानः शरभोजिमहाराजो मूर्तिमान् धर्म इव आचन्द्रार्कं विजयताम् ॥

काले वर्षति वासवो वसुमती सस्योज्ज्वला जायते
षट्कर्माणि वितन्वतेक्षितिसुराः वर्णैस्त्रिभिः पूजिताः ।
धर्मश्रीः कलिदुर्जया विजयते सर्वत्र सञ्चारिणी
वीरश्रीः शरभोजिराजनृपतौ विश्वंभरां बिभ्रति ॥

श्रीमन्नंध्रुववेङ्कटेशकविना 'साहित्यभोजेन' यत्
वीरश्री'शरभोजिराजचरितं' शब्दार्थचित्रं कृतम् ।
सन्तश्चेतमि सर्वमङ्गलयुतं चम्पूप्रबन्धं रसैः
आस्वाद्यं दधतामयं च लभतामाचन्द्रतारस्थितिम् ॥

॥ इति भोसलवंशावलिचम्पूप्रबन्धे श्रीशरभोजिराजचरितवर्णनं नाम
प्रथमाश्वासः समाप्तः ॥

SARASVATI MAHAL LIBRARY SOCIETY PRESS, THANJAVUR.